स्वोपज्ञवृत्ति विभूषितम्

क्षेत्रस्पर्शनाप्रकरणम्

● रचयिता ●

पू.मुनि श्री जगच्चंद्र विजयजी

(प.पू.आ.भ.श्रीमद्विजय जगच्चंद्रसूरीश्वर महाराजाः)

● संशोधकाः ●

● प्रेरक - मार्गदर्शक - संशोधकाः ●

सिद्धान्तमहोदधि - कर्मसाहित्यनिष्णाताः

परमपूज्य आचार्यदेव श्रीमद्विजय

प्रेमसूरीश्वर महाराजाः

प्रकाशन

वि.सं. :- २०६६

प.पू.आ.भुवनभानु सूरि जन्मशताब्दी तथा

प.पू.पं.पद्मविजयजी स्वर्गारोहण अर्धशताब्दी वर्षे

नकल :- 500/- **मूल्य :- पठन-पाठन**

● प्राप्तिस्थान ●

१. **प्रकाशक**

२. **शाह बाबुलाल सरेमलजी बेडावाला**
"सिद्धाचल" सेन्ट अेन्स स्कूल सामे
हीराजैन सो. साबरमती, अमदावाद-5.

३. **दिलीप नाथालाल शाह**
अमदावाद-1. मो : 94263 05288

४. **हस्तमेलाप एम्पोरीयम,**
C/o. सतीश बी. शाह, गोलवाड नाका,
रतनपोल, अमदावाद-1. ओ : 2535 7258

५. **मुद्रक**
जय जिनेन्द्र ग्राफिक्स (नितीन शाह-जय जिनेन्द्र)
E-175, ग्राउन्ड फ्लोर, बी.जी. टावर,
दिल्ली दरवाजा बहार, अमदावाद-4.
घर : 2656 2795 ओ : 2562 1623
मो : 98250 24204
E-mail : jayjinendra90@yahoo.com

• दिव्यवंदना •

प.पू.सिद्धांतमहोदधि आचार्यदेव
श्रीमद्विजय **प्रेमसूरीश्वरजी** महाराजा

प.पू.वर्धमानतपोनिधि आचार्यदेव
श्रीमद्विजय **भुवनभानुसूरीश्वरजी** महाराजा

प.पू. समतासागर पंन्यासप्रवरश्री
पद्मविजयजी गणिवर्य

• शुभाशीष •

प.पू. सिद्धांतदिवाकर गच्छाधिपति आचार्यदेव
श्रीमद्विजय **जयघोषसूरीश्वरजी** महाराजा

प्रास्ताविकम्

सकल आधि व्याधि अने उपाधिमांथी मुक्त थवानो उपाय "**ज्ञानक्रियाभ्यां मोक्षः**" ए सूत्रानुसारे सम्याग्ज्ञान अने सम्यग्क्रिया ए बन्ने रुप छे ते छतां ते बन्नेमां सम्यग्ज्ञानननी प्रथम आवश्यक्ता छे. केमके सम्यग्ज्ञान विना सम्यक् क्रिया असम्भवित छे. ज्यां सुधी जीव अजीव आदि तत्त्वोनुं पदार्थोनुं वास्तविक ज्ञान न होय त्यां सुधी हिंसा-त्याग अहिंसापालन आदि सम्यक्क्रिया क्यांथी प्रवर्ती शके ? न ज प्रवर्ते; माटे ज कह्युं छे के "**पढमं णाणं तओ दया**". आ रीते जोतां जीवादि तत्त्वोना ज्ञानननी प्रथम आवश्यकता छे.

बीजी रीते जोतां पण "**सम्यग्दर्शन ज्ञानचारित्रकताणि मोक्षमार्गः**" ए सूत्रानुसारे सम्यग्दर्शन = तत्त्वश्रद्धा, सम्यग्ज्ञान अने सम्यक्चारित्र ए त्रणरुप मोक्षमार्ग कह्यो छे, छतां तेमां मध्यवर्तिज्ञान पूर्वात्तरवर्तिदर्शन अने चारित्रनुं पालक पोषक छे, अने तेथी सूत्रमां तेनी मध्यवर्त्तिता छे, तेम प्रधानता पण छे.

कोई पण पदार्थनुं वास्तविक ज्ञान ते पदार्थनुं नाम मात्र सांभळवाथी के वांचवाथी नथी थई जतुं परंतु ते पदार्थना अस्त्ित्वादिनी सूक्ष्म विचारणा करी ते पदार्थविषयक चोक्कस निर्णय पर आववाथी थाय छे. तेवी ज रीते ते पदार्थना जातिभेदादि लई विचारणा करतां तेनो सूक्ष्म सूक्ष्मतर अने दृढ दृढत्तर बोध थाय छे.

दा.त. जीवपदार्थ लईए तो जीवनुं अस्तित्व कई कई रीते सिद्ध छे ? जीवना अवान्तर भेदोनुं (नरकगत्यादिमार्गणास्थानोनुं)

अस्तित्व कई कई रीते सिद्ध छे ? हवे जो तेनुं अस्तित्व सिद्ध छे तो ते जीवो सामान्यथी अने जातिभेद केटली संख्यामां होय ?, ते ते जातिभेदरुपे केटलो काल टकी शके ?, अन्य जातिभेदने प्राप्त थयेला पुनः ते जातिभेदने केटला काळमां प्राप्त करे ?, कोई एक समये समस्त जगतमां प्राप्त थाय के जगतना अमुक भागमां प्राप्त थाय ? इत्यादि विचारणाथी जीव पदार्थनो सूक्ष्म अने दृढ बोध थाय छे.

आ जातनी विचारणा करवा माटे शास्त्रोमां अनेक प्रकारो आवे छे, जेने **अनुयोगद्वार** कहेवाय छे, जेमके

[१]संतपयपरुवण, या [२]दव्वपमाणं च [३]खित, [४]फुसणा य ।
[५]कालो अ, [६]अंतरं [७]भाग [८]भावे [९]अप्पाबहुं चेव ॥१॥

आमां [१]सत्पदप्ररुपणा नामना प्रथम द्वारथी जीवादि ते ते पदार्थना अस्तित्वनो विचार, [२]'द्रव्यप्रमाण द्वारथी तेनी संख्यानो विचार,[३६] क्षेत्र' द्वारथी कोई एक समये जीवादि ते ते पदार्थनी हयातीनां स्थाननो विचार, [४]'स्पर्शना' द्वारथी समस्त अतीतकालनी अपेक्षाए जीवादिनी हयातीनां स्थान इत्यादि विचारणा कराय छे. बीजां पण पदार्थोनां चितंन-मनन माटे उपयोगी द्वारो छे, कह्युं छे के **'निर्देशस्वामित्वसाधनाधिकरणस्थितिविधानतः'** इत्यादि-

वर्तमानमां सिद्धान्तमहोदधि कर्मशास्त्र-निष्णात पू. आचार्यदेव श्री **विजयप्रेमसूरीश्वरजी महाराज** साहेबनी निश्रामां तेओश्रीनो शिष्य-प्रशिष्यादि परिवार कर्मसाहित्यना विविध अंगो उपर विपुल प्रमाणमां साहित्य सर्जन करी रहेल छे, कर्मसाहित्यना अनेक ग्रन्थोनुं अध्ययन अने अन्वेषण करी एक-एक विषय पर मौलिक ग्रन्थो तैयार करी रहेल छे, तेना फलस्वरूप **''खवगसेढी''** (क्षपकश्रेणी) अने

''ठिइबंधो'' (स्थितिबन्ध) नामक बे महाकाय ग्रन्थोनुं प्रकाशन विशिष्ट समारोह पूर्वक राजनगरना आंगणे गत वर्षनी आखरमां थयेल छे ते सौ कोई जाणे छे, आगळना ग्रन्थोनुं कार्य पण अविरत पणे चालु छे, प्रकाशितग्रन्थ अने प्रकाशमां आवनारा ग्रन्थो तथा बीजा पण ग्रन्थोमां उपयोगी एवुं **द्रव्यप्रमाणप्रकरण स्वोपज्ञ** लघु विवेचन साथे **'ठिइबंधो'** ग्रन्थना परिशिष्ट तरीके प्रकाशित थई गयुं छे. ते ज रीते अन्य ग्रन्थमां अने स्वाध्याय-रुचि महानुभावोने उपयोगी जणावाथी विपुल पदार्थोना संग्रहरुप प्रकाशित थतुं आ **स्वोपज्ञवृत्ति सहित क्षेत्रस्पर्शना-प्रकरण** छे.

आ क्षेत्रस्पर्शना-प्रकरण मां पदार्थज्ञानना सूक्ष्म अने सम्यग् बोधमां हेतु उपर्युक्त अनुयोग द्वारोमांनां क्षेत्र अने स्पर्शना ए बे द्वार लई जीवपदार्थनो विचार करवामां आव्यो छे ते पण **'गइइंदिए य काये'** इत्यादि गाथा प्रसिद्ध १४ मूलमार्गाणाभेदानुसारी १७४ भेदप्रभेदमां करायो छे.

क्षेत्रनो विचार [१]**उपपात** [२]**स्वस्थान** अने [३]**समुद्घात** एम त्रण भेदथी अने स्पर्शनानो विचार **गमनागमनरुप** चोथा भेदथी पण करवामां आव्यो छे.

आ त्रण प्रकारनुं क्षेत्र अने चार प्रकारनी स्पर्शना कषाययुक्त अने कषाय रहित जीनोनी अपेक्षाए जुदी जुदी बताववामां आवी छे.

आ बधा पदार्थोने **जीवविचार** आदि प्रकरणोनी जेम प्रथम गाथाओमां गुंथी लई प्रकरणकर्ताए पोते तेना विवेचनरुप टीकानी रचना करी छे.

आ प्रकरणनुं स्वोपज्ञवृत्तिसहित संयोजन पू. आचार्यदेव

विजयप्रेमसूरीश्वरजी म. श्रीना प्रशिष्य स्व. पू. पंन्यासजी श्री **पद्मविजयजी** गणिवरना शिष्यरत्न पू. मुनिराज श्री **जगच्चन्द्रविजयजी** महाराजश्रीए करेल छे अने संशोधन उपरोक्त पू. **आचार्यदेवेश** तथा पू. **मुनिराजश्री जयघोषविजयजी म.** तथा पू. मुनिराजश्री **धर्मानन्दविजयजी म.** आदि मुनिवरोए करेल छे.

तत्त्वज्ञानने लगता आवा ग्रन्थोनी रचना अने संशोधन करवाथी आत्मा **स्वाध्याय** नामक अभ्यंतर तपमां रत बने छे, विभावदशाथी दूर रही स्वभावदशामां रमणता करे छे अने ते द्वारा अनंता कर्मोनो क्षय करी अपूर्व निर्जरानो भागी बने छे.

आ ग्रन्थनुं संयोजन-संपादन करनारा मुनिपुंगवो स्वात्मकल्याण साधवा साथे आ विषयना जिज्ञासु अनेक आत्माओने उपकारक बन्या छे.

प्रकरणनी प्राकृत भाषामां रचेली मूळगाथाओ अने तेना पर संस्कृत भाषामां रचेली टीकानुं निरीक्षण करतां ते अभ्यासीओने कंठस्थ करवामां तथा वांचवा समजवामां घणी अनुकूळ रहेशे तेम जणाई आवे छे.

तेओ उत्तरोत्तर कर्मसाहित्यादि जुदाजुदा विषयो उपर पोताना अध्ययन द्वारा प्राप्त थयेली विशिष्टताओने सरळ सुबोध भाषामां रजु करी स्व-पर कल्याण साधे अने जिज्ञासु मुमुक्षु जनो तेनो लाभ उठावे एज अंतःकरणनी अभिलाषा.

पालीताणा	लि.
वि.सं. २०२३	**कपूरचन्द रणछोडदास वारैया**
वैशाख वद ११	अध्यापक
ता. ३-६-६७	श्री जैन सूक्ष्मतत्त्वबोध पाठशाला

प्राक्कथनम्

ऐन्द्रश्रीसुखार्थिभिः शुभज्ञान-ध्यान-परायणैर्भवितव्यमिति शास्त्रोक्त-वचनानुसारेण तातपादै-र्गुरुप्रदत्त-सिद्धांतमहोदधि-बिरुदसफलीकरणप्रवीणैः पूज्याचार्यभगवद्भिः **प्रेमसूरीश्वरैः** स्वनिश्रावर्तिसाधुवृन्द-योगक्षेमकरणतत्परैः कर्मसाहित्यसर्जने-ऽनेके साधवो व्यापारिताः ।

तेषां च साधूनां मध्ये मुनिराजश्री जगच्चन्द्र विजयो न्यायशास्त्रदक्षो तर्कनिपुणोऽभवत् ।

येन परम-गुरुदेवानां भावनामनुसृत्य स्थितिबंध-विषयक-कर्मसाहित्यसर्जनं षष्ठिसहस्रश्लोकप्रमाणं कृतं । एवं साऽवचूरिकं 'द्रव्यप्रमाणप्रकरणं', वृत्तियुतं 'क्षेत्रस्पर्शनाप्रकरण'ञ्चापि-विरचितं ।

अत्रान्तरे स्वकीय-गुरुदेवाः स्वनामधन्य-न्यायविशारद-पूज्याचार्यदेव-श्रीमद्विजय **भुवनभानु**सूरिवर-प्रथमशिष्य-लघुबन्धु-सहदीक्षित-पंन्यासप्रवरश्री **पद्मविजय**-गणिवरा दिवंगताः । ततस्तेषां गुरुदेवानां गुणस्मरणार्थं 'गुरु गुण सौरभं चतुस्त्रिंशत्कं' संदृब्धम् ।

एवं कर्मसाहित्यरचना-तत्परे मुनिजगच्चन्द्रविजयादि-मुनिवृन्दे सति

पूज्य परमाराध्यपादाः प्रेमसूरीश्वरा दिवंगतास्तेषां स्वर्गगमनानंतरं परमाघातानुभविता मुनिश्री जगच्चंद्र विजय उद्विग्नमनाः कस्मिन्नपि कार्ये चित्तसंधानं कर्तुमशक्नुवन् रात्रिंदिवं परमगुरुदेव-गुणस्मरणैकरतो जातः । ते च परमगुरुदेवगुणाः ग्रंथस्था कृताः । अर्थात् (प्रेमसूरीश्वर रासः) 'गुरु गुण अमृतवेली' विरचिता ।

इत्थमनेन मुनिवरेण गुणवद्बहुमानाद् गुणवैभवः संप्रातः । क्रमेण गुरुगुणामृतपानेन-संयमवल्ली पुष्टीकृता ज्ञान-ध्याने प्रगतीकृता योग्यता विकासीकृता गणिपदपंन्यासपदा-ऽऽचार्यपदप्राप्तिपूर्वकं सूरिमंत्र पंचपीठसमाराधनं कृतम् । अनेके साधुगणाः शास्त्राभ्यासनिरताः कृताः ।

किं बहुना ? यावन्तो लाभा लब्धव्याः ते सर्वे अनेन मुनिवरेण लब्धाः ।

अयं निर्देशः पूर्वकालीनापेक्षः, वर्तमानकाले तु अयं मुनिवरोऽस्माकं पंचदश-शिष्यगणानां योगक्षेमकारिणः परमवात्सल्यमूर्तयः संयमैकलक्षिणः प्रातःस्मरणीयाः पूज्यपादा आचार्य भगवंतः श्रीमद्विजय **जगच्चंद्रसूरीश्वराः ।**

एतद् ग्रंथचतुष्टयं यावच्चन्द्रदिवाकरौ विजयेते तावद् सतां

शास्त्राभ्यासकरणे दीपकसमानप्रकाशप्रदायि भवतात् । इति शम् ।

— गुरुदेव प्रसादेन-ज्ञान-ध्यान-
संयम प्रगति कामुको

विजयाऽभयचंद्रसूरिः

पू.आ.श्री भुवनभानुसूरि
स्मृतिमंदिरे
पंकज जैन संघ,
पालडी, अमदावाद
भा.व. १०
रविपुष्ययोगे

समर्पणम्

योऽस्ति श्रीप्रेमसूरीश-पट्टप्रद्योतको महान् ।
भुवनभानुसूरीशं, वन्दे सन्मार्गदं गुरुम् ॥१॥
यं श्रिता बोध-वैराग्य-तपस्त्यागादयो गुणाः ।
भुवनभानुसूरीशं वन्दे सन्मार्गदं गुरुम् ॥२॥
येन सद्देशनाभानु-भानुसंबोधिता वयम् ।
भुवनभानुसूरीशं वन्दे सन्मार्गदं गुरुम् ॥३॥
यस्मै सृष्टा कृपावृष्टि-गुरुभिर्गुणमूर्तये ।
भुवनभानुसूरीशं वन्दे सन्मार्गदं गुरुम् ॥४॥
यस्मात् सद्बोधदोद्भूता सूत्रार्थचित्रदर्शिका ।
भुवनभानुसूरीशं वन्दे सन्मार्गदं गुरुम् ॥५॥
यस्य शतद्वयासन्न-पद्मादियतिनां गणः ।
भुवनभानुसूरीशं वन्दे सन्मार्गदं गुरुम् ॥६॥
यस्मिन् परार्थता भव्या, करुणा चाऽप्रमत्तता ।
भुवनभानुसूरीशं वन्दे सन्मार्गदं गुरुम् ॥७॥
अष्टोत्तरशतौलीनां कारक ! जगदाधृते !
भो ! वन्दे तार्किकप्रष्ठ ! वर्धमानतपोनिधे ॥८॥
शतेन वा सहस्रेणा-ऽशक्या गुणस्तुतिस्तव ।
अतः समर्प्य सत्शास्त्रं स्वात्मानं तोषयाम्यहम् ॥९॥

गुरुपदकजभृङ्ग
स्व. अनुयोगचार्यश्रीपद्मविजयशिष्याणु-
आचार्य विजय जगच्चन्द्रसूरिः

विषयानुक्रमः

विषयः	पृष्ठाङ्क
प्रास्तविकम्	४-७
प्रक्केथनम्	८-९
समर्पणम्	११
सावचूरिकं-द्रव्यप्रमाणप्रकरणम्	१५-२१
द्रव्यप्रमाणप्रकरण**मूलगाथाः**	२२-२३
अनुबन्धचतुष्टयम्	२६-२७
अधिकृतमार्गणाभेदाः	२७-२९
क्षेत्रस्पर्शनास्वरूपं क्षेत्रभेदाश्च	२९-३१
अधिकृतमार्गणाभेदेषु सकषायजीवानाश्रित्य उत्पाद-समुद्घात-स्वस्थान-भेदभिन्नत्रिविधक्षेत्रप्रतिपादनम्	३१-३९
अधिकृतमार्गणाभेदेषु अकषायजीवानाश्रित्याऽनन्तरोक्तत्रि-भेदक्षेत्रप्रतिपादनम्	४०-४३
अधिकृतमार्गणासु सकषायजीवापेक्षया स्वस्थानस्पर्शना-प्रतिपादनम्	४४
अधिकृतमार्गणासु सकषायजीवान् समाश्रित्य उत्पाद-समुद्घात-गमना-गमनकृतत्रिविधस्पर्शनाप्रतिपादनम्	४५-५९
वैमानिकदेवादिजीवानां स्थानादि-विषयकवचनभेदान् समाश्रित्याऽन्यथा स्पर्शनोद्भावने दिग्दानम्	६०-६२
अकषाय जीव कृत स्पर्शना	६२-६३

ग्रन्थकारगुरुप्रमुखानां प्रशस्तिः ६३-६५
क्षेत्रस्पर्शनाप्रकरण**मूलगाथाः** ६६-७१
પૂ.આ.પ્રેમ સૂરિ મ.સા. તથા પૂ.પં. પદ્મવિજયજી મ.સાનો
ટૂંક પરિચય ७२
गुरु-गुण अमृतवेली रास ७४-९५
ગુરુ-ગુણ સૌરભ ચૌત્રીશી ९६-९९

चित्रानुक्रमः

प्रसङ्गायात-**'दोसु उड्ढकवाडेसु तिरिय-लोयतट्टे य'**
इति व्यवहारनयप्रधान-सूत्राणुसारेणाऽपर्याप्ततेजस्कायजीवानां
क्षेत्रप्रदर्शकं चित्रम् । ३५
चतुर्दशरज्जुप्रमाणे लोके तत्तन्नारकतत्त-देवादीनां रज्जुभेदेन
स्थानदर्शकं चित्रम् ५३

卐 श्री महावीर स्वामिने नमः 卐

श्री प्रेमसूरीश्वरगुरुभ्यो नमः

परिमाणादितत्तद्द्वारेषु तद्वृत्त्यादौ
निरयगत्योघादिसप्तत्युत्तरशतमार्गणास्वविशेषेणाभिहितस्य
संख्येयाऽसंख्येयादिलक्षणस्य बन्धकपरिमाणस्य
विशेषेणाऽवबोधार्थं
सावचूरिकं

द्रव्यप्रमाणप्रकरणम्

(अवचूरिः)

चरमं तीर्थपतिं नत्वा, गच्छेशं स्वगुरूंस्तथा ।
ग्रन्थे द्रव्यप्रमाणाख्ये व्याख्या किञ्चिद्वितन्यते ॥१॥

इह लघु अवधारणाय यथार्थाभिधानस्य द्रव्यप्रमाण-प्रकरणयाऽऽरिप्सया प्रथमं तावन् मङ्गलादिप्रतिपादिका गाथाभिधीयते-'**नमिउं**' इत्यादि,

नमिउं अरिहंताई
सगुरुपसाया सुयाणुसारेणं ।
गइआइद्दाणेसुं
भणिमो जीवाण परिमाणं ॥१॥

इह पूर्वार्धेन मङ्गल-सम्बन्धौ साक्षादुक्तौ, उत्तरार्धेन त्वभिधेयम्, प्रयोजनं तु सामर्थ्यगम्यम् । तत्र अरीणां-रागद्वेषाद्यान्तरशत्रूणां हननात्, यद्वा चतुस्त्रिंशतमतिशयात् देवेन्द्रादिकृतां पूजां वाऽर्हन्तीत्यर्हन्तस्ते आदौ येषामर्हत्सिद्धाऽऽचार्योपाध्यायसाधूनां तेऽर्हदादयस्तानर्हदादीनं '**नत्वा**' कायवाङ्मनोयोगैः प्रणम्य '**स्वगुरूणां**' भवविरागजनक-सम्यग्दर्शनज्ञा-

नादिप्रापकपोषकप्रव्रज्याप्रदायकादीनां गच्छाधिपति-**श्रीमत्प्रेमसूरीश्वर**-तातपादप्रभृतीनां प्रसादात् '**श्रुतानुसारेण**' आगमार्थमनतिक्रम्य '**गइआइद्दाणेसुं**' ति गत्यादीनि गतीन्द्रियकायादिलक्षणानि निरयगत्योघ-प्रथमद्वितीयपृथिव्यादि-निरयभेदादितदुत्तरभेदलक्षणानि च यानि सप्तत्यु-त्तरशतमार्गणास्थानानि तानि मध्यमपदलोपाद्गत्यादिस्थानानि तेषु '**जीवाण**' त्ति अस्मदादीनां कर्मनिगडनिबद्धानां प्राणिनाम्, अनेन सिद्धानां व्यवच्छेदो बोद्धव्यः । तेषां '**परिमाणं**' संख्येयत्वाऽसंख्ये-यत्वादिलक्षणं संख्यामानं '**भणामि**' त्ति 'सत्सामीप्ये' इत्याद्यनु-शासनादनुपदं भणिष्यामीत्याद्यगाथार्थः ॥१॥

णिरये य पढमणिरये,
भवणवइसुरम्मि आइमदुकप्पे ।
अंगुलअसंखभाग-
प्पएसमित्ताउ सेढीओ ॥२॥

प्रतिज्ञातमेव निर्वाहयन्नाह-'**णिरये**'त्यादि, निरयगत्योघे, प्रथमपृथिवीनिरयभेदे, भवनपति-सुरभेदे, सौधर्मे-शानकल्पद्वयलक्षणे आद्यकल्पद्वये चेत्येवं पञ्चमार्गणास्थानेषु प्रत्येकम् '**अंगुले**'त्यादि, अङ्गुलस्याऽसंख्येयतमे भागे यावन्तो नभप्रदेशास्तावत्संख्याकासु सप्तरज्ज्वायतासु सूचिश्रेणिषु यावन्त आकाशप्रदेशास्तावन्तो जीवाः सन्तीत्यर्थः ॥२॥

सेसणिरय-तइआइछ-
कप्प-नरेसुं अपज्जमणुसे य ।
सेढिअसंखंसो सुर-
वंतर-जोइससुरेसुं य ॥३॥

सव्वेसु पणिंदितिरिय-
विगल-पणिंदि-तसकाय-मण-वयणेसुं ।
बायरसमत्त-भू-दग-
पत्तेअवणेसु विक्कियदुजोगेसुं ॥४॥
थी-पुरिस-विभंग-णयण-
सुहलेसतिगेसु तह य सण्णिम्मि ।
पयरअसंखंसड्डिअ
सेढिगयपएसतुल्लाऽत्थि ॥५॥

'**सेसणिरये**' त्यादि, शेषेषु द्वितीयादिपृथिवीभेदभिन्नेषु षट्सु निरयेषु, तृतीयादिषु सनत्कुमार-माहेन्द्र-ब्रह्म-लान्तक-शुक्र-सहस्राराख्येषु षट्सु कल्पेषु, '**नर**' त्ति मनुष्यगत्योघे, अपर्याप्तमनुष्ये चेत्येवं चतुर्दशमार्गणास्थानेषु प्रत्येकं '**सेढिअसंखंसो**' त्ति सप्तरज्ज्वायताया एकप्रादेशिक्याः श्रेणेः 'असंख्यांशः'-असंख्यभागगताकाशप्रदेशैः परिमिता जीवाः सन्तीत्यर्थः ।

'**सुरवंतरे**'त्यादि, देवगत्योघे, व्यन्तरसुर-ज्योतिष्कसुरयोः, सर्वेष्वोघ-पर्याप्ता-ऽपर्याप्तातिरश्चीभेदभिन्नेषु पञ्चेन्द्रियतिर्यग्भेदेषु सर्वेष्वोघ-पर्याप्ता-ऽपर्याप्तभेदभिन्नेषु '**विकल**' त्ति द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रियास्तेषामेकैकस्य त्रिषु त्रिषु भेदेषु, तथैव सर्वेषु त्रिसंख्याकेषु पञ्चेन्द्रियजातिभेदेषु, सर्वेषु त्रिसंख्याकेषु त्रसकायभेदेषु, सर्वेष्वोधोत्तर-भेदभिन्नेषु पञ्चसु मनोयोगभेदेषु तथैव पञ्चसु वचोयोगभेदेषु, तथा '**बायरसमत्ते**' त्यादि, तत्र समाप्तशब्दः पर्याप्तवाची, ततो बादरपर्याप्तपृथिवीकायाऽप्काययोः, बादरपर्याप्तप्रत्येकवनस्पतिकाये, वैक्रियतन्मिश्रयोगलक्षणयोर्द्वयोर्योगयोः, स्त्रीवेद-पुरुषवेद-विभङ्गज्ञानेषु,

'**णयण**' त्ति चक्षुर्दर्शने, तेजः-पद्म-शुक्ललेश्यालक्षणे शुभलेश्यात्रिके तथा संज्ञिनीत्येवं पञ्चचत्वारिंशन्मार्गणास्थानेषु प्रत्येकं '**पयरे**' त्यादि, घनीकृतलोकस्य यत्प्रतरं तस्यासंख्यांशस्थितासु श्रेणिषु यावन्तो नभःप्रदेशास्तावद्भिर्नभःप्रदेशैस्तुल्या जीवाः सन्तीत्यर्थः ॥३-४-५॥

संखेज्जा मणुसी-नर-
पज्जा-ऽवेअ-मणणाण-सव्वत्थे ।
संयम-छेअ-समाइअ-
सुहुमा-ऽऽहारदुग-परिहारे ॥६॥

'**संखेज्जा**' इत्यादि, मानुषी, पर्याप्तमनुष्यः, अपगतवेदः, मनःपर्यवज्ञानम्, सर्वार्थसिद्धदेवः, संयमौघः, सामायिकसंयमः, छेदोपस्थापनसंयमः, परिहारविशुद्धिकसंयमः, सूक्ष्मसम्परायसंयमः, आहारक-तन्मिश्रयोगलक्षणमाहारकद्विकं चेत्येवं द्वादश-मार्गणास्थानेषु प्रत्येकं संख्येया जीवाः सन्ति ॥६॥

सेसाऽऽणताइसुर-मइ-
सुय-ऽवहिदुग-देसविरय-सम्मेसुं उ ।
पल्लाऽसंखंसो उव-
सम-वेअग-खइअ-मीस-सासाणेसुं ॥७॥

'**सेसाणताई**'त्यादि भणितशेषेष्वानतकल्पादिषु चतुरनुत्तरविमानान्तेषु सप्तदशसु सुरभेदेषु, मतिज्ञान-श्रुतज्ञाना-ऽवधिद्विक-देशविरत-सम्यक्त्वौघेषु, तथा '**पल्लासंखंसो उवसमे**'त्यादि, औपशमिकसम्यक्त्वे क्षायिकसम्यक्त्व-मिश्रदृष्टि-सासादनदृष्टिष्वित्येवमष्टाविंशतिमार्गणास्थानेषु पल्योपमस्याऽसंख्यभागो जीवा ज्ञेयाः । इह हि '**सम्मेसुं उ**' इत्यत्र तुकारो विशेषद्योतनार्थः, अर्थात् '**पल्लाऽसंखंसो**' इति सामान्येनोक्तेऽपि आनतकल्पादि-सप्तदशदेवगतिमार्गणास्थानेषु क्षायिकसम्यक्त्वे च 'पल्ल'

इत्यनेनाद्धापल्योपमो ग्राह्यः, शेषमतिज्ञानादि-दशमार्गणास्थानेषु तु तेन क्षेत्रपल्योपमो ग्राह्य इति ॥७॥

बायरसमत्तवज्जिअ-
भू-दग-ऽगणि-वाउकायभेएसुं ।
पत्तेअवणम्मि य तद-
पज्जे लोगा असंखिज्जा ॥८॥

'**बायरसमत्ते**'त्यादि, तत्र समत्तशब्दः प्राग्वत्, ततश्च-बादरपर्याप्तभेदवर्जितेषु ओघ-बादरौघ-तदपर्याप्त-सूक्ष्मौघ-तत्पर्याप्ता-ऽपर्याप्तभेदभिन्नेषु '**भूदगगणिवायुकायभेएसुं**' ति षट्सु पृथ्विकायभेदेषु, षट्सु अप्कायभेदेषु, षट्सु अग्निकायभेदेषु, षट्सु वायुकायभेदेषु, तथा प्रत्येकवनस्पतिकायौघे तदपर्याप्तभेदे चेत्येवं षड्विंशतिमार्गणास्थानेषु प्रत्येकं '**लोगा असंखिज्जा**' त्ति असंख्येयेषु लोकप्रमाणेषु क्षेत्रखण्डेषु यावन्त आकाशप्रदेशास्तावन्तो जीवाः सन्तीत्यर्थः ॥८॥

बायरपज्जाग्गिम्मि उ
देसूणघणावलीअ समयमिआ ।
बायरपज्जाणीले
संखंसो हुन्ति लोगस्स ॥९॥

'**बायरपज्जाग्गिम्मि**' इत्यादि, बादरपर्याप्ता-ऽग्निकायमार्गणास्थाने पुनः '**देसूणे**'त्यादि, आवलिकायाः समयेषु घनीकृतेषु यावन्तः समया भवेयुस्ततः स्तोकमात्रेणैकदेशेन न्यूना जीवा भवन्तीत्यर्थः ।

'**बायरपज्जाणीले**' त्ति बादरपर्याप्ते '**ऽनीले**' वायुकाये लोकस्य संख्येयतमे भागे यावन्त आकाशप्रदेशाः सन्ति तावन्तो जीवाः सन्तीत्यर्थः ॥९॥

सेसाड्ङतीसठाणे-
ऽणंता जीवा हवन्ति इइ रइयं ।
अप्पावहारणड्ढा
रज्जे सिरिपेमसूरीणं ॥१०॥
ताण पसीसाण पउम-
विजयगणिंदाण सीसलेसेण ।
दव्वपमाणपगरणं
नन्दउ जा वीरजिणतित्थं ॥११॥

'**सेसाऽड**'इत्यादि, उपर्युक्तशेषेषु तिर्यग्गत्योघा-दिष्वष्ट-त्रिंशन्मार्गणास्थानेषु प्रत्येकं '**णंता**'त्ति अनंता जीवाः सन्ति । **अष्टा-त्रिंशच्छेषमार्गणास्थानानि त्विमानि**-तिर्यग्गत्योघः, ओघ-बादरौघ-तत्पर्याप्ता-ऽपर्याप्त-सूक्ष्मौघ-तत्पर्याप्ता-ऽपर्याप्तभेदभिन्नाः सप्त एकेन्द्रियभेदाः, तथैव सप्त साधारणवनस्पतिकाय-भेदाः, वनस्पतिकायौघः, काययोगौघः, औदारिक-तन्मिश्र-कार्मणकाययोगाः, नपुंसकवेदः, क्रोधादि-कषायचतुष्कम् मत्यज्ञान-श्रुताज्ञाने, असंयमः, अचक्षुर्दर्शनम्, कृष्णादित्र्यशुभलेश्याः, भव्या-ऽभव्यौ, मिथ्यात्वम्, असंज्ञी, आहारका-ऽनाहारकौ चेति ।

अथोपसंहरन्नाह-'**इइ रइय**'मित्यादि, अस्य चान्वय उत्तर-गाथोत्तरार्धे '**दव्वपमाणे**'त्यादिना, तथा च 'इति' सप्तत्युत्तर-शतमार्गणास्थानेषु जीव-परिमाणकथनद्वारेण रज्जे **सिरिपेमसूरीणं**'ति चतुर्विधसङ्घकौशल्याधारसुविहितशिरोमणिकर्मशास्त्र-पारङ्गतसिद्धान्त-महोदधीनां श्रीमतां **प्रेमसूरीणां** 'राज्ये'-साम्राज्ये प्रवर्तमाने '**ताण**' त्ति तेषां पूज्यपादानां '**पसीसाण**' त्ति प्रशिष्याणां-शिष्यशिष्याणाम्, तत्र प्रेमसूरीश्वरपूज्यपादानां स्वशिष्याः सुविख्यातनामधेयाः स्वात्मसाधना-

ऽविकलभव्यजन्तुहितकरानेकविधकुशलप्रवृत्तिपरायणाः **पं०श्रीमद्भानु-विजयगणीन्द्राः**, तच्छिष्यास्तु स्वभावसरलाः प्रशान्तप्रकृतयः सौम्यवदनाः स्वर्गताः श्रीमन्तः **पं०पद्मविजयगणीन्द्राः**, एतदेवाह-'**पउमविजये**' त्यादि, तेषां पद्मविजयगणीन्द्राणां '**सीसलेसेण**' त्ति शिष्यलेशेन, समयोक्तशिष्यगुणानां यथावदभाजनतया नामशिष्य-प्रायेण **जगच्चन्द्र-विजयेन मुनिना** '**अप्पावहारणट्ठा**' त्ति आत्मनोऽवधारणार्थं रचितमिदं द्रव्यप्रमाण-प्रकरणं यावच्छ्रीवीरस्वामिनस्तीर्थं तावन्नन्दतु, भव्यजन-नयन-वदन-मानसदीन्यनवद्यान्याधाराण्यवा-प्येति शेषः ॥१०-११॥

॥ इति स्वोपज्ञावचूरि सहितम्
द्रव्यप्रमाणप्रकरणम्
समाप्तम् ॥

॥ शुभं भूयात्सर्वेषाम् ॥

● ● ●



द्रव्यप्रमाणप्रकरणम्

(मूलगाथाः)

नमिउं अरिहंताई
   सगुरुपसाया सुयाणुसारेणं ।
गइआइड्डाणेसुं
   भणिमो जीवाण परिमाणं ॥१॥
णिरये य पढमणिरये,
   भवणवइसुरम्मि आइमदुकप्पे ।
अंगुलअसंखभाग-
   प्पएसमित्ताउ सेढीओ ॥२॥
सेसणिरय-तइआइछ-
   कप्प-नरेसुं अपज्जमणुसे य ।
सेढिअसंखंसो सुर-
   वंतर-जोइससुरेसुं य ॥३॥
सव्वेसु पणिंदितिरिय-
   विगल-पणिंदि-तसकाय-मण-वयणेसुं ।
बायरसमत्त-भू-दग-
   पत्तेअवणेसु विक्कियदुजोगेसुं ॥४॥
थी-पुरिस-विभंग-णयण-
   सुहलेसतिगेसु तह य सण्णिम्मि ।
पयरअसंखंसड्डिअ-
   सेढिगयपएसतुल्लाऽत्थि ॥५॥

संखेज्जा मणुसी-नर-
   पज्जा-ऽवेअ-मणणाण-सव्वत्थे ।
संयम-छेअ-समाइअ-
   सुहुमा-ऽऽहारदुग-परिहारे ॥६॥
सेसाऽऽणताइसुर-मइ-
   सुय-ऽवहिदुग-देसविरय-सम्मेसुं उ ।
पल्लाऽसंखंसो उव-
   सम-वेअग-खइअ-मीस-सासाणेसुं ॥७॥
बायरसमत्तवज्जिअ-
   भू-दग-ऽगणि-वाउकायभेएसुं ।
पत्तेअवणम्मि य तद-
   पज्जे लोगा असंखिज्जा ॥८॥
बायरपज्जाग्गिम्मि उ
   देसूणघणावलीअ समयमिआ ।
बायरपज्जाणीले
   संखंसो हुन्ति लोगस्स ॥९॥
सेसाड्डतीसठाणे
   ऽणंता जीवा हवन्ति इइ रइयं ।
अप्पावहारणड्डा
   रज्जे सिरिपेमसूरीणं ॥१०॥
ताण पसीसाण पउम-
   विजयगणिंदाण सीसलेसेण ।
दव्वपमाणपगरणं
   नन्दउ जा वीरजिणतित्थं ॥११॥

• • •

卐 श्री शंखेश्वरपार्श्वनाथाय नमः 卐

श्री प्रेमसूरीश्वरगुरुभ्यो नमः

चतुःसप्तत्युत्तरशतमार्गणास्थानान्यधिकृत्य
नानासकषाया-ऽकषायजीवानां
क्षेत्र-स्पर्शनयोः प्रतिपादकं
स्वोपज्ञवृत्तिविभूषितं

क्षेत्रस्पर्शनाप्रकरणम्

नत्वा शङ्खेश्वरं पार्श्वं, गच्छेशं स्वगुरूंस्तथा ।
क्षेत्र-स्पर्शनसंदर्भः स्वोपज्ञस्तन्यते कियत् ॥

卐

इह तावत्स्वपरहितकाम्यया यथार्थाभिधं क्षेत्र-स्पर्शनाप्रकरणमारिप्सुर्ग्रन्थकृदादौ मंगलादिप्रतिपादिकां गाथामभिधत्ते-

नमिउं अरिहंताई
सगुरुपसाया सुयाणुसारेणं ।
बेमि गइआइगेसुं
जीवाणं खित्त-फुसणाऊ ॥१॥

"**नमिउं**" इत्यादि, इह पूर्वार्धेन मङ्गलसम्बन्धौ साक्षादुक्तौ, उत्तरार्धेन त्वभिधेयम्, प्रयोजनं तु सामर्थ्यगम्यम् । तत्र अरीणां-रागद्वेषाद्यान्तरशत्रूणां हननात्, यद्वा चतुस्त्रिंशतमतिशयान् देवेन्द्रादिकृतां पूजां वाऽर्हन्तीत्यर्हन्तस्ते आदौ येषामर्हत्सिद्धाऽऽचार्योपाध्यायसाधूनां तेऽर्हदादयस्तानर्हदादीन्

'**नत्वा**' कायवाङ्मनोयोगैः प्रणम्य '**स्वगुरूणां**' भवविरागजनक-सम्यग्दर्शन-ज्ञानादिप्रापक-पोषक-प्रवज्याप्रदायकादीनां गच्छाधिपति **श्रीमत्प्रेमसूरीश्वर**तातपादप्रभृतीनां प्रसादात् '**श्रुतानुसारेण**' आगमार्थमनतिक्रम्य '**बेमि**' त्ति ब्रवीमि, किमित्याह-'**गइ**' इत्यादि, गत्यादिषु '**गइ-इंदिए य**' इत्यादिना गाथा-द्वयेन वक्ष्यमाणेषु सोत्तरभेदभिन्नेषु मार्गणास्थानेषु '**जीवानां**' सकषाया-ऽकषायभेदभिन्नानां क्षेत्रस्पर्शने 'संपइकाले' त्यादिना वक्ष्यमाणस्वरूपे इति ।

इह क्षेत्रस्य स्पर्शनायाश्च सकषाया-ऽकषायजीवभेदेन प्ररूपणं तु वक्ष्यमाणसमुद्घातकृतक्षेत्र-स्पर्शनयोर्मारणान्तिकसमुद्घात-केवलिसमुद्घात-भेदेन प्रदर्शनार्थम्, अन्यथा तत्समुद्घातद्वयं विहाय शेषसमुद्घातकृत-क्षेत्रस्पर्शनयोः स्वस्थानक्षेत्रस्पर्शनापेक्षयाऽविशिष्टत्वेऽपि विशिष्टस्य मारणसमुद्घातकृतक्षेत्रादिद्वयस्य सर्वलोकप्रमाणकेवलिसमुद्घात-कृतक्षेत्राद्यन्तःप्रविष्टतया न स्यान्मनुष्यगत्योघादिमार्गणास्थानेषु यत्र केवलिसमुद्घातस्यापि सद्भावस्तत्र मारणसमुद्घातकृत-क्षेत्रादेर्विशेषतोऽवगम इति ॥१॥

अथ 'गत्यादिकेषु' इत्युक्तम्, तत्र गत्यादिकानेवाऽधिकृत-सभेदप्रभेदानाह-

गइ-इंदिए य काये,
जोए वेए कसाय-नाणे य ।
संजम-दंसण-लेसा,
भव-सम्मे सन्नि-आहारे ॥२॥
सगचत्ते-गुणवीस-दु-
चत्ता-ऽड्डार-चउ-पंच अड्ड-ड्ढा ।

चउ-छ-दु-सत्त-दुग-दुगं,
चउसयरिसयं कमा णेया ॥ ३ ॥

''**गइ-इंदिए य**'' इत्यादि, इहोत्तरगाथाप्रान्त भणितेन '**कमा णेया**' इति वचनेन गतीन्द्रियेत्यादीनां '**सगचते-गुणवीसे**'त्यादिभिर्यथा-संख्यमन्वयः, तथा च सप्तचत्वारिंशद्गतिभेदाः । **तद्यथा**-नरक-गत्योघः, रत्नप्रभादिपृथ्वीभेदभिन्नाः सतमनरकगत्युत्तरभेदाः, तिर्यग्गत्योघः, पञ्चेन्द्रियतिर्यगोघः, पर्याप्ता-ऽपर्याप्त-तिरश्चीभेदात् त्रयः पञ्चेन्द्रिय-तिर्यगुत्तरभेदाः, मनुष्यगत्योघः, पर्याप्ता-ऽपर्याप्त-मानुषीभेदतस्त्रयो मनुष्यगत्युत्तरभेदाः, देवगत्योघः, भवनपतिव्यन्तर-ज्योतिष्क-द्वादशकल्पोपपन्न-नवग्रैवेयक-पञ्चानुत्तरवैमानिकभेदभिन्ना एकोनत्रिंश-द्देवगत्युत्तरभेदा इति । '**इंदिए**' त्ति एकोनविंशतिरिन्द्रिय-भेदाः । **तद्यथा**-एकेन्द्रियौघः, ओघ-पर्याप्ताऽपर्याप्तभेदात् त्रयः सूक्ष्मैकेन्द्रिय-भेदास्तथैव त्रयो बादरैकेन्द्रियभेदा इति समस्ताः सप्तैकेन्द्रियभेदाः; ओघ-पर्याप्ताऽपर्याप्तभेदभिन्नास्त्रयो द्वीन्द्रियभेदास्तथैव त्रयस्त्रीन्द्रियभेदा-स्त्रयश्चतुरिन्द्रियभेदास्त्रयः पञ्चेन्द्रियभेदाश्चेति । '**काये**' त्ति द्विचित्वारिं-शत्कायमार्गणाभेदाः । **तद्यथा**-अनन्तरोक्तैकेन्द्रियमार्गणाभेदवत्सप्त-पृथिवीकायभेदाः, सप्ताऽप्कायभेदाः, सप्त तेजस्कायभेदाः, सप्त वायुकाय-भेदाः, वनस्पतिकायौघः, प्रागिव सप्त साधारणवनस्पतिकायभेदाः, ओघ-पर्याप्ता-ऽपर्याप्तभेदात् त्रयः प्रत्येकवनस्पतिकायभेदाः, तथैव त्रयस्त्रसकायभेदाश्चेति । ''**जोए**'' त्ति अष्टा दश योगमार्गणाभेदाः । **तद्यथा**-काययोगौघः, औदारिक-तन्मिश्र-वैक्रिय-तन्मिश्रा-ऽऽहारक-तन्मिश्र-कार्मण-काययोगभेदभिन्नाः सप्त काययोगोत्तरभेदाः, मनोयोग-सामान्यः, सत्याऽसत्य-मिश्र-व्यवहारमनोयोग-भेदाच्चत्वारो मनोयोगोत्तर-

भेदाः, वचोयोगसामान्यः, सत्या-ऽसत्यादिभेदान्मनोयोगवच्चत्वारो वचोयोगोत्तरभेदाश्चेति । ''**वेए**'' त्ति स्त्री-पुरुष-नपुंसकभेदात् त्रयोऽपगत-वेदश्चेति चत्वारो वेदमार्गणाभेदाः । ''**कसाय**'' त्ति क्रोध-मान-माया-लोभभेदा-च्चत्वारः, प्रतिपक्षस्यापि ग्रहणात्पञ्चमो-ऽकषायभेदश्चेति । '**नाणे**'' त्ति मतिज्ञान-श्रुतज्ञाना-ऽवधिज्ञान-मनःपर्यवज्ञान-केवलज्ञानानि, प्रतिपक्षभूताज्ञानभेदानामपि ग्रहणात् मत्यज्ञान-श्रुताज्ञान-विभङ्गज्ञानानि चेति अष्टौ ज्ञानमार्गणा-भेदाः । ''**संजम**'' त्ति प्रागिव सप्रतिपक्षा अष्ट संयममार्गणाभेदाः । तद्यथा-संयमौघ-सामायिक-छेदोपस्थापनीय-परिहारविशुद्धिक-सूक्ष्मसम्पराय-यथाख्यातसंयम-देशसंयमा-ऽसंयमा इति । ''**दंसण**''त्ति चक्षुर्दशना-ऽचक्षुर्दर्शना-ऽवधिदर्शन-केवलदर्शन-भेदाच्चत्वारो दर्शनमार्गणाभेदाः । ''**लेसा**'' त्ति कृष्ण-नील-कापोत-तेजः-पद्म-शुक्लभेदात् षड् लेश्याभेदाः । ''**भव**'' त्ति भव्यस्तत्प्रति-पक्षभूताभव्यश्चेति द्वौ भेदाविति । ''**सम्मे**'' त्ति सम्यक्त्वौघः, क्षायिक-क्षायोपशमिकौ-पशमिकसम्यक्त्व-सम्यग्मिथ्यात्व-सासादन-मिथ्यात्वा-नीति सप्रतिपक्षाः सप्तेति । ''**सन्नि**'' त्ति प्रतिपक्षसहितत्वात्संज्ञ्यसंज्ञी चेति द्वौ । तथैव ''**आहारे**'' त्ति आहारका-ऽनाहारकाविति द्वौ भेदा-विति । ''**चउसयरिसयं**'' ति तदेते नरकगत्योघाद्याः सर्वसंख्यया चतुःसप्तत्युत्तरशतं ज्ञेया इति ॥२-३॥

उक्ता नरकगत्योघाद्या अधिकृतमार्गणा भेदाः । एतर्हि यदुक्तम् 'क्षेत्रस्पशने ब्रवीमि' तत्र क्षेत्र-स्पर्शनयोर्विशेषं क्षेत्रभेदांश्चाह-

संपइकाले खेत्तं,
फुसणा पुण होइ अइगये काले ।
खेत्तं तिहोववाय-स-
ठाण-समुग्घायभेयाओ ॥४॥

"**संपइ**" इत्यादि, संप्रतिकाले'-वर्तमानकाले जीवानां यत्रावस्थानं तत्क्षेत्रमुच्यते, स्पर्शना पुनरतिगते काले जीवानां यत्रावस्थानमित्येतल्ल-क्षणा । तत्र वर्तमानकालः समयमात्रः, अतिगतस्त्वनन्तपुद्गल-परावर्तमान इत्येवं कालविशेषाक्षिप्तः क्षेत्र-स्पर्शनयोर्विशेषः । तत्र क्षेत्रं त्रिधा भवति, कथमित्याह-"**उववाये**" त्यादि, उपपातो नाम भवप्रथमसमयः, तत उपपातात्, उपपातापेक्षया क्षेत्रम्, नरकगत्योघादि- तत्तन्मार्गणा-नुरूपनारकत्वादितत्तत्पर्यायापन्नभवप्रथमसमय-वर्तिजीवराशिसम-वगाढाकाशप्रदेशा इति यावत् । स्वस्थानं नाम उत्पत्त्युत्तरं तेन तेन नारकत्वादिभावेन यत्र जीवानां साहजिकमवस्थानम्, तदपेक्षया क्षेत्रं स्वस्थानक्षेत्रम् । समुद्घातस्तु 'वेयण कसाय मरणे वेउव्विय-तेयए य आहारे । केवलि य समुग्घाया' इति वचनात्सप्तविधः, तस्मात् समुद्-घातात्, समुद्घातापेक्षयेत्यर्थः ।

इह सप्तविधसमुद्घातमध्ये वक्ष्यमाणक्षेत्रविशेषः स्पर्शनाविशेषश्च मारणान्तिकसमुद्घातापेक्षया केवलिसमुद्घातापेक्षया वा विज्ञेयः, न पुनः शेष-पञ्चविधसमुद्घातापेक्षया, कथम् ? पञ्चविधसमुद्-घातेन स्वस्थानादिक्षेत्रतोऽधिकक्षेत्रस्यावगाहभावेऽपि तथाविधक्षेत्रस्य-स्वस्थानादिक्षेत्रतोऽसंख्येयभाग - लक्षणस्तोकमात्रांशेनाधिकतया भेदेनानुपलक्ष्यमाणत्वात्, तत्रैव मारणसमुद्घातसम्भवे तु तस्य मारणसमुद्-घाताक्षिप्तक्षेत्रान्तःप्रविष्टत्वाच्च । अत एव यत्र समुद्घातकृतस्पर्श-नाप्रतिषेधः करिष्यते तत्रासौ मारणान्तिकसमुद्घाताभावेन विशेषप्ररूप-णाऽविषयत्वा-द्विज्ञातव्यः, न पुनः सर्वथा समुद्घाताभावात् ।

ननु शेषपञ्चविधसमुद्घातकृतक्षेत्रविशेषस्य मारणसमुद्घात-कृतक्षेत्रान्तःप्रविष्टतया तत् पञ्चविधसमुद्घातकृतक्षेत्रं यदि नाधिक्रियेत

तदा तेनैव न्यायेन केवलिसमुद्घातकृतक्षेत्राऽन्तःप्रविष्टतया मारणसमुद्घातकृतक्षेत्रप्ररूपणमपि निरवकाशतामा-स्कन्दते ? इति चेद्, सत्यम्, परं न सर्वत्र मार्गणास्थानेषु केवलिसमुद्घातो लभ्यते, अपि तु केषुचिन्मनुष्य-गत्योघादिष्वेवाऽसौ प्राप्यते, तथा च मनुष्यगत्यो-घादिमार्गणास्थानानि विहाय सावकाशं मारणसमुद्घात-कृतक्षेत्रप्ररूपणम्, किञ्च मनुष्यगत्योघादिमार्गणास्थानेष्वपि सकषाया-ऽकषायजीवभेदेन क्षेत्रस्य प्ररूपणीयत्वात् तत्राऽपि तत् सावकाशमेवेति सर्वमनवद्य-मिति । क्षेत्रप्ररूपणावदेव समुद्घातकृतस्पर्शनाप्ररूपणाऽपि मारण-समुद्घातकृतस्पर्शनां केवलिसमुद्घातकृतस्पर्शनां वाधिकृत्य बोद्धव्येति । तदेवं क्षेत्रत्रैविध्यमुपदर्शितम् ॥४॥

अथ यथोक्तोपपातादिभेदभिन्नत्रिविधक्षेत्रं प्रोक्तमार्गणाभेदेषु प्रतिपिपादयिषुरादौ तावत् सकषायजीवानधिकृत्य प्राह-

तिरिये एगिंदिय-भू-
दग-अगणि-पवण-णिगोअओहेसुं ।
तेसिं सुहुमोहेसुं
तेसिं च अपज्ज-पज्जेसुं ॥५॥
वणओह-कायजोगो-
रालिय तम्मीस कम्मजोगेसुं ।
कीवे कसायचउगे
दुअणाणा-ऽयत-अणयणेसुं ॥६॥
अपसत्थलेस-भवि-यर-
मिच्छत्तेसु अमणम्मि आहारे ।

हवइ तह अणाहारे
खित्तं तिविहंपि सव्वजगं ॥७॥

"**तिरिये**" इत्यादि, तिर्यग्गत्योघः, एकेन्द्रियौघः, पृथिवीकायौघः, अप्कायौघः, तेजस्कायौघः, वायुकायौघः, साधारणवनस्पतिकायौघः, "**तेसिं सुहुमोहेसुं**" ति एतेषामेकेन्द्रियौघादीनां षण्णां ये सूक्ष्म-विशेषणविशिष्टाः षट् सूक्ष्मैकेन्द्रियौघादिलक्षणाः सूक्ष्मौघभेदास्तथा "**तेसिं च अपज्जपज्जेसुं**" ति तेषां सूक्ष्मैकेन्द्रियौघादीनां षण्णां ये षडपर्याप्तसूक्ष्मैकेन्द्रियादिलक्षणाः षट् पर्याप्तसूक्ष्मैकेन्द्रियादिलक्षणाश्च मार्गणाभेदास्तेषु पञ्चविंशतिमार्गणाभेदेषु, तथा वनस्पतिकायौघ-काययोगौघौ-दारिकौ-दारिकमिश्र-कार्मणकाययोग-नपुंसकवेद-क्रोधादिकषायचतुष्टय-मत्यज्ञान-श्रुताज्ञाना-ऽसंयमा-ऽचक्षुर्दर्शनानि कृष्णाद्यप्रशस्तलेश्यात्रिक-भव्या-ऽभव्य-मिथ्यात्वाऽसंज्ञ्या-ऽऽहार्य ऽनाहारिमार्गणास्वित्येवं सर्वसंख्ययाऽष्टचत्वारिंश-न्मार्गणासु प्रत्येकं '**खेत्तं तिविहंपि सव्वजगं**" ति उपपातादिभेदभिन्नं यथोक्तं त्रिविधमपि क्षेत्रं 'सर्वजगत्' अशेषो लोको भवति, तद्धि प्रतिसमयं सर्वलोकव्यापिनः सूक्ष्मस्य पर्याप्तस्याऽपर्याप्तस्य वा पृथिवीकाया-द्यन्यतमजीवराशेः प्रत्येकं प्रवेशात्तथा ज्ञेयम् । तदुक्तं **श्रीप्रज्ञापनागमे द्वितीये स्थानपदे**-

'कहि णं भंते ! सुहमपुढवीकाइयाणं पज्जत्तगाणं अपज्जत्तगाणं य ठाणा पन्नत्ता ? गोयमा ! सुहुमपुढवीकाइया जे पज्जत्तगा जे अपज्जत्तगा ते सव्वे एगविहा अविसेसा अणाणत्ता सव्वलोगपरियावन्नगा प० समणाउसो !' इत्यादि । इत्येवमन्योऽपि वचनसंवादो द्रष्टव्य इति ॥५-६-७॥

दुविहं इगिंदियतिगे,
थूले पवणे अपज्जपवणे-य ।
सट्ठाणा हीणजगं,

"**दुविहं**" इत्यादि, '**सव्वजगं**' इत्यनन्तर-गाथात इहापि सम्बध्यते, तथा च '**स्थूले**' बादरे एकेन्द्रियत्रिके एकेन्द्रियौघ-तत्पर्याप्ता-ऽपर्याप्तभेदत्रयाऽऽत्मके, तथा "**पवणे**" इत्यादि, '**थूले**' इत्यस्या-नन्तरोक्तस्येहापि सम्बन्धाद् बादरवायुकायौघेऽप-र्याप्तबादरवायुकाये च '**द्विविधम्**' उपपात-समुद्घातभेदभिन्नं नानाजीवसम्बन्धि यथोक्तलक्षणं क्षेत्रं सर्व-लोको भवति, न पुनः स्वस्थानादपि सर्वलोकः । "**सट्ठाणा**" त्ति स्वस्थानात्तु हीनमसंख्येयभाग-लक्षणेनैकदेशेन "**जगत्**"-लोको भवति । एतद्धि तत्तन्मार्गणास्थपर्याप्ता-ऽपर्याप्तान्यतरबादरवायुकाय-जीवाक्षिप्तं विज्ञेयम्, न तु वायुकायेतरबादरजीवापेक्षया, तेषां बादर-पृथिव्यादीनां स्वस्थानतो लोकासंख्येयभागगतत्वात् । बादरवायुकायिकानां तु देशोनलोकवर्ति-त्वाच्च । तदुक्तं श्री**प्रज्ञापनोपाङ्गे**-

'कहि णं भंते ! अपज्जबादरवायुकायियाणं ठाणा पन्नत्ता ? गोयमा ! जत्थेव बादरवायुकायियाणं पज्जत्तगाणं ठाणा पन्नत्ता तत्थेव बादरवायुकायियाणं अपज्जत्तगाणं ठाणा पन्नत्ता, उववाएणं सव्वलोए, समुग्घाएणं सव्वलोए, सट्ठाणेणं लोयस्स असंखेज्जेसु भागेसु' इति ॥

तिहावि पज्जत्तवाउम्मि ॥८॥

"**तिहा**" इत्यादि, '**थूले**' इत्यस्यानन्तरोक्तस्येहापि सम्बन्धाद् बादरपर्याप्तवायुकाये त्रिधाऽपि, न पुनरनन्तरोक्तनीत्या केवलं स्वस्थानात्; त्रिधा, कियत् ? देशोनलोकः, तच्च '**हीणजग**' मित्यस्येहापि

सम्बन्धादवसातव्यम् । **तदुक्तम्**-

'कहि णं भंते !............एत्थणं बादर-वायुकायियाणं पज्जत्तगाणं ठाणा पन्नत्ता, उववाएणं लोयस्स असंखेज्जेसु भागेसु. समुग्घाएणं लोयस्स असंखेज्जेसु भागेसु, सट्ठाणेण लोयस्स असंखेज्जेसु भागेसुं' इति ॥८॥

लोओ बायरभू-दग-
ऽणल-पत्तेयतरुगेसु सिमपज्जेसुं ।
थूले य णिगोअतिगे
दुहा सठाणा भवे जगअसंखंसो ॥९॥

"**लोओ**" इत्यादि, 'लोकः' इत्यस्य 'द्विधा' इति परेणान्वयः, तथा सति बादरेषु पर्याप्ता ऽपर्याप्तविशेषणविरहितेष्वौघिकेषु ? पृथिव्यप्तेजस्कायौघ-लक्षणेषु मार्गणास्थानेषु, प्रत्येकवनस्पतिकायौघे, तथा "**सिमपज्जेसुं**" ति तेषां बादरपृथिवी-कायादिप्रत्येकवनस्पतिकायान्तानां चतुर्णाम् 'अपर्याप्तेषु' । अपर्याप्तबादरपृथ्वीकाया-ऽप्काय-तेजस्काया-ऽपर्याप्तप्रत्येकवनस्पतिकायलक्षणमार्गणाचतुष्टये इति भावः । तथा "**थूले य**" त्ति 'स्थूले'-बादरे निगोदत्रिके, ओघ-पर्याप्ता-ऽपर्याप्तभेदभिन्नबादरसाधारणवनस्पतिकायमार्गणाभेदत्रय इत्यर्थः । इत्येवं समुदितासु सर्वसंख्ययैकादशमार्गणासु प्रत्येकमुपपात-समुद्घातभेदाद् '**द्विधा**' द्विविधं क्षेत्रं सर्वलोको भवति । एतास्वेवैकादशमार्गणासु जीवानां स्वस्थान-क्षेत्रं तु "**जगअसंखंसो**" त्ति लोकासंख्येयभागमात्रमेव भवति । तत्र द्विधा सर्वलोकः प्रत्येकं मार्गणासु असंख्यलोकपरिमितानां तदधिकानां वा जीवानां प्रविष्टत्वात्, लोकाऽसंख्येयभागः पुनर्बादरपर्याप्ता-ऽपर्याप्तपृथिवीकायादितया रत्नप्रभादिभूमिपिण्डा-

दावेवाऽवस्थानात् । यत उक्तम्-

'कहि णं भंते ! बादरपुढवीकाइयाणं पज्जत्तगाणं ठाणा पन्नत्ता ? गोयमा । सट्ठाणेण अट्ठसु पुढवीसु, तं जहा-रयणप्पभाए-सक्करप्पभाए-वालुयप्पभाए-पंकप्पभाए-धूमप्पभाए-तमप्पभाए-तमतमप्पभाए ईसीप्पब्भाराए. अहोलोएपायालेसु भवणेसु भवणपत्थडेसु निरएसु निरयावलियासु निरयपत्थडेसु, उड्ढलोए-कप्पेसु विमाणेसु विमाणावलियासु विमाणपत्थडेसु, तिरियलोए-टंकेसु कूडेसु सेलेसु सिहरीसु पब्भारेसु विजयेसु वक्खारेसु वासेसु वासहरपव्वएसु वेलासु वेइयासु दारेसु तोरणेसु दीवेसु समुद्देसु, एत्थ णं बायरपुढवीकाइयाणं पज्जत्तगाणं ठाणा पन्नत्ता, उववाएणं लोयस्स असंखेज्जभागे समुग्घाएणं लोयस्स असंखेज्जभागे सट्ठाणेणं लोयस्स असंखेज्जभागे । कहि णं भंते । बादरपुढवीकाइयाणं अपज्जत्तगाणं ठाणा पन्नत्ता ? गोयमा ! जत्थेव बादरपुढवीकाइयाणं पज्जत्तगाणं ठाणा पन्नत्ता तत्थेव बादरपुढवीकाइयाणं अपज्जत्तगाणं ठाणा पन्नत्ता, उव्वाएणं सव्वलोए, समुग्घाएणं सव्वलोए, सट्ठाणेणं लोयस्स असंखेज्जइभागे ।' इति । इत्थमेव बादराप्कायादिक्षेत्रविषयेऽपि सूत्रसंवादो द्रष्टव्य इति ।

ननु भवत्वेवमपर्याप्तबादरतेजस्कायमार्गणां विहाय बादरपृथिवी-कायौघादिमार्गणास्थानेषु द्विधा लोकस्तथा स्वस्थानतो लोकाऽसंख्येयभागः क्षेत्रम्, अपर्याप्तबादरतेजस्कायमार्गणायां तु केवलं समुद्घातत एव तत्सर्वलोको भणितं सूत्रे, न पुनः शेषद्विविधमपि । तथा च **श्रीप्रज्ञापनाग्रन्थः**-"कहि णं भन्ते ! बायरतेउकाइयाणं अपज्जत्तगाणं ठाणं प०, गोयमा ! जत्थेव बायरतेउकाइयाणं पज्जत्तगाणं ठाणा तत्थेव बायरतेउकाइयाणं अपज्जत्तगाणं ठाणा प०, उववाएणं लोयस्स दोसु उड्ढकवाडेसु तिरियलोयतट्टे य, समुग्वाएणं सव्वलोए, सट्ठाणेणं

लोयस्स असंखेज्जइभागे'' ? **इति चेत्**, सत्यम्, परं तत्र उपपातत: ''उववाएणं लोयस्स दोसु उड्ढकवाडेसु तिरियलोयतट्टे य'' इत्यनेन यत् लोकासंख्येयभागमात्रक्षेत्रं भणितं तद्व्यवहारनयं समाश्रित्य ज्ञेयम्, तद्वृत्तौ तथा व्याख्यातत्वात् । तथा चोक्तं तद्वृत्तौ- ''तदेवमिदं सूत्रं व्यवहारनयप्रदर्शनेन व्याख्यातम्, तथा सम्प्रदायात्, युक्तं चैतद्, ''विचित्रा सूत्राणां गति:'' इति वचनात्' इति । अत्र तु तदन्यक्षेत्रवदिदमपि क्षेत्रं ऋजुसूत्रनयानुसारेण प्रतिपादितं ज्ञेयम्, ऋजुसूत्रनये उदितबादराऽपर्याप्ततेजस्कायिकायुर्नामगोत्राणां बादरापर्याप्ततेजस्कायिकत्वेन व्यपदेशस्येष्टत्वात्, तथाविधानां तूक्तोर्ध्वकपाटद्वय-तिर्यग्लोकतो बहिरपि सर्वत्र लाभात् ।

एतदुक्तं भवति-समग्रलोकवर्तिसूक्ष्मजीव-राशितश्च्युत्वाऽपि अपर्याप्तबादरतेजस्कायिकत्वेन एक-द्वि-त्र्यादिवक्रेणोत्पद्यमाना जीवा लभ्यन्ते सर्वस्मिन्नपि लोके, तेषु च स्वस्थानप्राप्त्यभिमुखीभूतेषु जीवेषु ये जीवा अर्धतृतीयद्वीपसमुद्रलक्षणात् मनुष्यलोकान्निसृते बाहल्यतोऽप्यर्धतृतीयद्वीपसमुद्रमाने पूर्वापरदक्षिणोत्तरस्वयम्भूरमणसमुद्रपर्यन्ते ऊर्ध्वमधोऽपि च लोकान्तं स्पृष्टे ये कपाटे, तथा कपाटद्वयाऽप्रविष्टो यस्तिर्यग्लोकशेषभाग:, **स्थापना**-

(**'दोसु उड्ढकवाडेसु तिरियलोयतट्टे य'** इति व्यवहारनयप्रधानसूत्रानुसारेणाऽपर्याप्ततेजस्कायजीवानां क्षेत्रप्रदर्शकं चित्रम्-)

(१) तिर्यग्लोकतट्टम्, (**'तिरियलोयतट्टे य'** इति पाठाधिकारे तु एतावत् कपाटबहिर्वर्ति तिर्यग्लोकक्षेत्रं न ग्राह्यम्) ।

(२) पूर्वा-ऽपरदिग्द्वयविस्तृतं बाहल्यतोऽर्धतृतीय-द्वीपसमुद्रमानं षड्दिक्षु लोकान्तस्पृक् कपाटम् ।

(३) उत्तर-दक्षिणदिग्द्वयविस्तृतं बाहल्यतोऽर्धतृतीय-द्वीपसमुद्रमानं षड्दिक्षु लोकान्तस्पृक् कपाटम् ।



इत्येतावति क्षेत्रे विद्यन्ते त एव व्यवहारनयदर्शने बादरापर्याप्त-तेजत्कायिका इति व्यवहारभाजो भवन्ति, न तु शेषाः कपाटद्वयाद् बहिर्व्यवस्थिताः, स्वस्थान-समश्रेणिकपाटद्वयाव्यवस्थितत्वेन तेषां विषमस्थान-वर्तित्वात् । अर्थाद् येऽद्यापि कपाटद्वये न प्रविष्टा नापि तिर्यग्लोकं प्रविष्टास्ते पूर्वभवस्था एव गण्यन्ते व्यवहारनये । यथोक्तकपाटद्वय-तिर्यग्लोकाऽवगाढ-क्षेत्रं तु लोकाऽसंख्येयभाग-मात्रमेवेति व्यवहारनयमताभ्युपगमात् सूत्रे सर्वलोको न भणितमुपपात-क्षेत्रम् । ऋजुसूत्रनये तु यथोक्तकपाटद्वयतिर्यग्लोकतो बहिःस्थिता अपि अपर्याप्तबादर-तेजस्कायिकाऽऽयुर्नामगोत्रोदयादपर्याप्त-बादरतेजस्कायिकत्वेन व्यपदिष्यन्त एव, तथा च तन्मताभ्युपगमादिह तेषामपर्याप्तबादरतेजस्कायिकानां क्षेत्रं सर्वलोको भणित-मित्येवं सर्वं सुस्थमेवेति ॥९॥

उक्तशेषमार्गणाभेदेषु प्रस्तुतत्रिविधक्षेत्रमाह-

तिविहंपि य सेसेसु स-
कसायजीवे पडुच्च इइ भणियं ।

"**तिविह**" मित्यादि, 'जगअसंखंसो' इत्येतदत्रापि संबध्यते, तथा च शेषेषु नरकगत्योघादिपञ्चोत्तरशतमार्गणाभेदेषूपपात-समुद्घात-स्वस्थानभेदभिन्नं त्रिविधमपि नानाजीवाश्रयं क्षेत्रं लोकासंख्यभागप्रमाणं भवति । नरकगत्योघादिशेषमार्गणाभेदास्त्विमे-सर्वे [८]नरकगतिभेदाः, सर्वे[४]पञ्चेन्द्रियतिर्यग्-भेदाः, सर्वे[४]मनुष्यगतिभेदाः, सर्वे[३०]देवगतिभेदाः, सर्वे [१२]विकलेन्द्रिय-पञ्चेन्द्रियभेदाः, [३]बादरपर्याप्त-पृथिव्य-प्तेजस्कायाः, [१]पर्याप्तप्रत्येकवनस्पतिकायः, सर्वे[३]त्रसकायभेदाः, [५]पंच मनोयोगभेदा, पञ्च[५]वचोयोगभेदाः, [१]वैक्रिय-[१]वैक्रियमिश्रा-[१]ऽऽहारका-[१]ऽऽहार-कमिश्रकाययोगभेदाः, [१]स्त्री-[१]पुरुषवेदौ, [१]अपगतवेदः, [४]मति-श्रुता-ऽवधि-

मनःपर्यवज्ञानानि, [१]विभङ्गज्ञानम्, [६]संयमौघ-सामायिक छेदोपस्थापन-परिहारविशुद्धिक-सूक्ष्मसम्परायसंयम-देशसंयमाः, [२]चक्षु-रवधिदर्शने, [३]तेजःपद्मशुल्कलेश्याः, [४]सम्यक्त्वौघ-क्षायिक-क्षायो-पशमिकौ-पशमिकसम्यक्त्वानि, [१]सम्यग्मिथ्यात्वं सास्वादनं [१]संज्ञी चेति । एतासु त्रिविधमपि क्षेत्रं लोका-ऽसंख्येयभागमात्रं तु प्रत्येकं सूक्ष्माणामयपर्याप्त-बादराणां पृथिवीकायिकादीनां पर्याप्तबादरवायुकायानां वाऽप्रवेशात् शेषाणां प्रविष्टानां पर्याप्तबादरपृथिवीकायिकादीनां तु तथास्वाभाव्यादेव रत्नप्रभादि-पृथ्वीपिण्डतयास्थितिमतां परिमाणतोऽपि असंख्येयलोक-प्रदेशराशितोऽत्यन्तं हीनानामेकस्मिन् समये स्वस्थानवदुपपाततः समुद्घाततो वा लोकासंख्येय-भागादधिकक्षेत्रस्यानवगाहनात् ।

ननु भवतु नरकगत्योघादिषु यथोक्तनीत्या स्वस्थानादि-त्रिविधक्षेत्रस्य मनुष्यगत्योघादौ उपपातक्षेत्रस्य स्वस्थानक्षेत्रस्य च लोकासंख्येयभागमानता, न पुनर्मनुष्यगत्योघादौ समुद्घातक्षेत्रस्यापि सा घटामाकलयति, केवलिसमुद्घातगतेनैकेनापि केवलिभगवता एकस्मिन् समये उत्कर्षतः समग्रलोकस्य स्वात्मप्रदेशैः पूरणाद् ? इति चेद्, सत्यम्, परं यदे तदभिहितं क्षेत्रं तत्सकषायजीवानधिकृत्य, न पुनरकषायजीवानधिकृत्य, तथा चाह-"**सकसायजीवे**" इत्यादि; सकषायजीवानधिकृत्य '**इति**' एवंप्रकारेण भणितं क्षेत्रम्, न च सकषायजीवानामसौ केवलि-समुद्घातो जायते, केवलिसमुद्घातं विहाय शेषसमुद्घाताक्षिप्तं क्षेत्रं तु नरकगत्योघादिमार्गणासु लोका-ऽसंख्येयभागमात्रमेवेत्येवं सकषायजीवाधिकारान् न दोषलेशोऽपि । अत एवेह शेषमार्गणाभेदेषु अकषाय-केवलज्ञान-केवलदर्शन-यथाख्यात-संयमलक्षणा-श्चत्वारो मार्गणाभेदा न संगृहीता इत्यप्यवसातव्यमिति ॥

ननु अकषायजीवानधिकृत्य तर्हि प्रस्तुत-त्रिविधक्षेत्रविचारे तत् कुत्र कियद्भवेदित्याह-

अकसाये अहिकिच्च उ,
ते जत्थऽत्थि तहि सव्वत्थ ॥१०॥
लोगस्स असंखंसो,
सट्ठाणाओ तहा समुग्घाया ।
पणमणवयुरालियदुग-
णाणचउग-दंसणतिगेसुं ॥११॥
उवसम-सण्णीसु तहा,
आहारेऽणत्थ होइ पुण्णजगं ।
ण हवइ उप्पाया खलु,
खित्तं कत्थवि गयं खित्तं ॥१२॥

"**अकसाये**" इत्यादि, अकषायजीवानधिकृत्य तु तेऽकषायजीवा यत्र मनुष्यगत्योघादिद्विचत्वारिंशन्मार्गणाभेदेषु 'सन्ति'-लभ्यन्ते तत्र सर्वत्र लोकस्याऽसंख्यभागः स्वस्थानाद्भवति । "**तहा समुग्घाया**" त्ति 'तथा'-तद्वदेव लोकासंख्यभागः समुद्घातादपि भवति, केवलं न सर्वेषु द्वाचत्वारिंशत्यपि मार्गणास्थानेषु किन्तु पञ्चमनोयोग-पञ्चवचोयोगौदारिकौ-दारिकमिश्रकाययोग-मति-श्रुता-ऽवधि मनःपर्यवज्ञान-लक्षणज्ञानचतुष्क-चक्षु-रचक्षु-रवधिदर्शनलक्षणदर्शन-त्रिकौ-पशमिकसम्यक्त्व-संज्ञ्याऽऽ-हारका इत्येवं द्वाविंशतिमार्गणाभेदेषु, न पुनर्मनुष्यगत्योघादि-शेषविंशति-मार्गणाभेदेष्वपीत्यर्थः । तर्हि तत्र तत्समुद्घाता-त्कियत्स्यादित्याह-"**ऽणत्थ होइ पुण्णजगं**" ति 'अन्यत्र'-उक्तान्यत्र मनुष्यगत्योघादिशेष-विंशतिमार्गणाभेदेषु प्रत्येकं प्रस्तुतत्वात्समुद्घातावाप्तं क्षेत्रं पूर्णं जगद् भवति । **अयम्भावः**- समुद्घातं प्रविष्टा अकषायजीवा उत्कर्षतोऽपि एकस्मिन् समये संख्येया एव प्राप्यन्ते, उपशान्तमोहादि-गुणस्थान-गतानामकषायजीवानामेव तद्भावात्, ते चाऽकषायजीवा विहाय केवलिसमुद्घातं लोकासंख्येयभागप्रमाणात्स्वस्थानक्षेत्रादसंख्येयगुणं क्षेत्रं मारणान्तिकसमुद्घातेन पूरयन्तोऽपि लोकाऽसंख्यभागमात्रक्षेत्र-मेव व्याप्नुवन्ति, न पुनस्तदधिकम् । संख्येयानामकषायमनुष्याणां मरणसमुद्घातेन मनुष्यलोकादूर्ध्व-मनुत्तरविमानं यावत् सप्तरज्जुदीर्घस्य बाहल्यतः स्वशरीरप्रमाणस्य च स्वात्मप्रदेशदण्डस्य प्रसारणे-ऽपि लोका-संख्येयभागमात्रावगाहनात्, वेदनादिशेष-समुद्घातापेक्षया तु स्वस्थानक्षेत्रतः संख्येयभाग-मात्राधिकक्षेत्रस्यैवाऽवगाहनाच्च । केवलिसमुद्घातेन तु एकेनाऽपि जीवेनोत्कृष्टतः परिपूर्णो लोकः पूर्यते, तथा चाऽकषायजीवो-पेतमनुष्यगत्योघादिद्विचत्वारिंशत्मार्गणाभेदमध्ये मनोयोगपञ्चकादिषु केवलिसमुद्घातगतजीवप्रवेशाभावेन मारणसमुद्घाताद्याक्षिप्तं सत् समुद्घातक्षेत्रं लोकाऽसंख्येयभागमात्र-मभिहितम्, मनुष्यगत्योघ-पर्याप्तमनुष्य-मानुषी-पञ्चेन्द्रियौघ-पर्याप्तपञ्चेन्द्रिय-त्रसकायौघ-पर्याप्त-त्रसकाय-काययोगौघ-कार्मणकाययोगा-ऽपगतवेदा-ऽकषाय- केवलज्ञान-संयमौघ-यथाख्यातसंयम-केवलदर्शन-शुक्ललेश्या-भव्य-सम्यक्त्वौघ-क्षायिकसम्यक्त्वा-ऽनाहारकलक्षणेषु 'ऽणत्थ' इत्यनेन संगृहीतेषु विंशतिसंख्याकेषु मार्गणाभेदेषु तु प्रत्येकं लभ्यते केवलिसमुद्घात-गतजीवप्रवेशात्तदाक्षिप्तं प्रस्तुतं समुद्घातकृतक्षेत्रं परिपूर्णो लोक इति तथा भणितमिति ।

यद्यपीह कार्मणकाययोगवदौदारिकौदारिकमिश्र-काययोगयोः केवलिसमुद्घातगतजीवानां लाभस्तथाप्यष्टसामयिकस्य केवलिसमुद्घातस्य

चतुर्थसमये एव केवलिसमुद्घातगतजीवात्मप्रदेशानां लोकव्याप्तेस्तृतीय-चतुर्थ-पञ्चमसमयेषु कार्मणकाययोगस्यैव प्रवर्तनाच्च न भवत्यौदारिक-तन्मिश्रयोगयोः केवलिसमुद्घातापेक्षयाऽपि सर्वलोकक्षेत्रम्, किन्तु यथोक्तं-लोकासंख्येयभागमात्रमेव तत्सम्पद्यते । **तथाहि**-आयुष्कस्थितितो-ऽधकस्थितिकानां वेदनीयाद्यघातिप्रकृतीनां क्षपणहेतोः केवली भगवान् समुद्घातं करोति, स च समुद्घातोऽष्टसामयिकः, तस्मिन् केवलिसमुद्घाते प्रथमसमये बाहल्यतः स्वशरीरप्रमाणमूर्ध्वाऽधश्चतुर्दशरज्जूच्छ्रितं स्वात्मप्रदेशदण्डं कुर्वन् लोकासंख्येयभागे तिष्ठति, द्वितीयसमये तस्मा-देवात्मप्रदेशदण्डात् बहूनात्मप्रदेशान् पूर्व-पश्चिमदिशोरुत्तर-दक्षिणदिशोर्वा पार्श्वद्वये लोकान्तं यावत् प्रसारयन्नूर्ध्वाधश्चतुर्दशरज्जूच्छ्रितदिग्द्वय-लोकान्तगामिकपाटा-कारेणव्यवस्थापयन् लोकासंख्येयभागे व्याप्तो भवति, लोकाऽसंख्येयबहुभागेषु तु न । तृतीयसमये तु तस्मादेव यथोक्त-मानात्कपाटात् शेषदिग्द्वये लोकान्तं यावदात्मप्रदेशान् विस्तारयन् लोकप्रान्तवर्तिनिष्कुटादिलक्षणस्तोकमात्रक्षेत्रं विहायाऽशेषप्रायलोकं व्याप्नोति, अयं हि मथिकरणकालः प्रतरकरणकालो वा भण्यते । चतुर्थसमये तु शेषभागमपि पूरयित्वा पञ्चमादिचतुःसमयेषु प्रातिलोम्येन यथासंख्यं लोक-मथि-कपाट दण्डान् संहरन्नष्टमे समये शरीरस्थो लभ्यते, तत्र मथ्यादि संहरता षष्ठ-सप्तमा-ऽष्टमसयवर्तिना तेन लोकासंख्येयभागः व्याप्यते । तथा चोक्तं **व्याख्याप्रज्ञप्तिवृत्तौ श्रीमदभयदेवसूरिपादैः**-

'असखेज्जइभागे होज्ज' त्ति शरीरस्थो दण्ड-कपाटकरणकाले च लोकासंख्येयभागवृत्तिः, केवलिशरीरादीनां तावन्मात्रत्वात् 'असंखेज्जेसु भागेसु होज्ज' त्ति मथिकरणकाले बहोर्लोकस्य व्याप्तत्वेन स्तोकस्य

चाव्याप्ततयोक्तत्वाल्लोकस्यासंख्येयेषु भागेषु स्नातको वर्त्तते, लोकाऽऽपूरणे च सर्वलोके वर्तते" इति ।

तत्र च दण्डकरणलक्षणे प्रथमे समये दण्डसंहरणलक्षणेऽष्टमे समये च तस्यौदारिक एव योगः, द्वितीय-षष्ठ-सप्तमसमयेषु औदारिकमिश्रो योगः, तृतीय-चतुर्थ-पञ्चमसमयत्रये तु कार्मणो योगः प्रवर्तते तस्य । तदुक्तं **प्रशमरतिप्रकरणे उमास्वातिचरणैः**-

"औदारिकप्रयोक्ता प्रथमा-ऽष्टमसमययोरसाविष्टः ।
मिश्रौदारिकयोक्ता सप्तम-षष्ठ-द्वितीयेषु ॥१॥
कार्मणशरीरयोगश्चतुर्थके पञ्चमे तृतीये च ।
समयत्रयेऽपि तस्मिन् भवत्यनाहारको नियमात् ॥२॥इति।

तदेवमौदारिक-तन्मिश्रकाययोगयोः केवलिसमुद्घातगतजीवलाभेऽपि प्रस्तुतक्षेत्रं लोकासंख्येयभागमात्रं प्रदर्शितमिति ।

"**ण हवइ**" इत्यादि, अकषायजीवानधिकृत्य भण्यमानं क्षेत्रम् "उत्पादाद्" उत्पादापेक्षया कुत्राऽपि मार्गणाभेदे न भवति, भवप्रथम-समयवर्तिनां जीवानामकषायत्वाभावदिति भावः ।

क्षेत्रप्ररूपणमुपसंहरति-"**गयं खित्त**"मिति क्षेत्रप्ररूपणं समाप्तमि-त्यर्थः ॥१०-११-१२॥

तदेवं भणितं नरकगत्योघादिष्वधिकृतमार्गणाभेदेषु सकषायजीवा-नधिकृत्याऽकषायजीवानधिकृत्य चोपपात-स्वस्थान-समुद्घातभेदभिन्नं त्रिविधं क्षेत्रम् । एतर्हि यथोक्तलक्षणां नानाजीवाश्रितां स्पर्शनां निजिगदिषुः क्षेत्रवदुपपातादिभेदात्स्पर्शनाप्रभेदान् प्रदर्शयन् प्राग्वदादौ सकषायजीवा-नधिकृत्य तामाह-

अह फुसणा अवि तिविहा,
तुरियावि गमागमेण देवाणं ।
सट्ठाणा सव्वत्थवि,
खित्तसमाणा हवइ सा उ ॥१३॥

"**अह**" इत्यादि, अथाऽऽनन्तर्ये, क्षेत्रप्ररूपणा-ऽनन्तरं स्पर्शनाप्ररूपणप्रस्ताव इति तदर्थः । "**फुसणा अवि तिविहा**" त्ति क्षेत्रवत् स्पर्शनाऽपि उपपात-स्वस्थानसमुद्घातभेदात् त्रिविधा भवति, "**तुरिया-ऽवि**" त्ति न केवलं क्षेत्रवत् त्रिधा, किन्तर्हि ? '**तुरिया**'-चतुर्थी अपि भवति, कथं केषामित्याह-"**गमागमेण देवाणं**" ति, केषाञ्चिद्भवन-पत्याद्यच्युतकल्पान्तानां देवानां जिनजन्मादिमह-क्रीडा-कुतूहल-पूर्वसांगतिकमीलनादिप्रयोजनेन गमनागमनादुत्कर्षतो-ऽधस्तृतीयभूमिमूर्ध्वमच्युतकल्पं तिर्यक् स्वयम्भूरमणसमुद्रवेदिकान्तं यावद् यथा-सम्भवमिति । तत्र '**सट्ठाणा**' त्ति नरकगत्योघादिषु सर्वत्र मार्गणास्थानेषु सा स्पर्शना 'स्वस्थानात्' स्वस्थानापेक्षया 'क्षेत्रसमाना'-स्वस्थानक्षेत्रेण यथोक्तमानेन समाना भवति । अत्र स्वस्थानस्पर्शनायाः स्वस्थानक्षेत्रेण तुल्यत्वं लोक-लोकासंख्येय-भागादिना प्रकारेण, न पुनः सर्वथा तुल्याकाशप्रदेशादिना । कथम् ? यत्र स्वस्थानतो लोकासंख्येयभागमात्रं क्षेत्रं तत्र स्वस्थानस्पर्शनाया लोकासंख्येभागमात्र-त्वेऽपि ? क्षेत्रस्य सामयिकत्वेन स्पर्शनायान्तु व्यतीतानन्तसामयिकत्वेन कुत्रचित् पञ्चेन्द्रियतिर्यगोघादौ तयोर्मध्येऽसंख्यगुणादितारतम्यस्यापि भावात्, क्षेत्रापेक्षया स्पर्शनाऽसंख्येय-गुणादिनाऽधिका भवतीत्यर्थः । एवमेवान्यत्राऽपि लोकासंख्येयभागादिना क्षेत्रस्पर्शनयोस्तुल्यत्वेऽपि क्षेत्रात्स्पर्शनाया विशेषता ज्ञातव्या । इति ॥१३॥

तदेवमभिहिता तुल्यवक्तव्यत्वादतिदेशेनैव सर्वमार्गणाभेदेषु जीवानां स्वस्थानस्पर्शना । साम्प्रतं शेषत्रिविधां यथासम्भवमाह-

णिरये सत्तमणिरये,
भागा छ दुहा गमागमा णत्थि ।
भागा इह पत्तेयं,
तसनाडिगयघणरज्जुरुवा ॥१४॥

"**णिरये**" इत्यादि, नरकगत्योघे सप्तमभूमि-नरकभेदे च "**भागा छ दुहा**" त्ति '**गमागमा णत्थि**' इत्यनेनाऽनुपदं गमनागमनकृतस्पर्शनायाः प्रतिषेतस्य मानत्वात् स्वस्थानस्पर्शनाया अनन्तरमेवातिदिष्टत्वाच्च 'द्विधा'-उपपातसमुद्घातलक्षणप्रकारद्वयापन्ना स्पर्शना षड् भागा भवतीत्यर्थः । "**गमागमा णत्थि**" त्ति देवानामिहाप्रवेशेन स्वस्थान-क्षेत्राद्विशिष्टा काचिद्गमनागमनकृता स्पर्शना नास्ति, न पुनः सर्वथा नास्तीत्यर्थः । इत्थमेवोत्तरत्रापि गमनागमनकृतस्पर्शनाप्रति-षेधे सा स्वस्थानाद्विशिष्टा नास्तीत्येवंरूपेण प्रतिषेधो ज्ञेयः, न पुनः सर्वथेति ।

ननु कियन्माना इमे प्रत्येकं भागा इत्याह-"**भागा**" इत्यादि, इह स्पर्शनाप्रस्तावेऽनन्तरोक्ता वक्ष्यमाणाश्च भागाः प्रत्येकमेक-रज्जुवृत्त-विस्तृत-चतुर्दशरज्जुच्छ्रितत्रसनाडिगतघनरज्जुरूपा ज्ञातव्याः । प्रत्येकं भागस्त्रसनाड्या एकचतुर्दशांशमानो भवतीति भावः । तथा च नरकौघ-सप्तमपृथिवीनरकभेदयोरुपपाततः समुद्घाततश्च षट् चतुर्दशांशास्त्रसनाडेः स्पर्शना । **तथाहि**-*'अर्धतृतीयद्विपसमुद्रान्तर्वर्तिनि आकाशे सर्वव्याप्त्या सिद्धा' इत्यादि- वचनात् पञ्चचत्वारिंशल्लक्षयोजनवृत्तविस्तृतमनुष्यक्षेत्रे

*सिद्धप्राभृतविंशतितमगाथावृत्तौ ।

एकमप्याकाशप्रदेशमविहाय सर्वतो यथाऽन–न्ताः सिद्धिमवाप्नुवन्नतीता–ऽनन्तकाले तथा ततः सर्वतोऽनन्ता मृत्युमवाप्य गत्यन्तरमपि प्राप्ता एव, अतीतकालस्यानन्तत्वेन योग्यतासद्भावे प्रत्येकं भावानामतीत–कालेऽनन्तशो भूतत्वात्, अस्ति हि मनुष्यक्षेत्रगतप्रत्येकाकाशप्रदेशा मनुष्याणां मृत्यधिकरणयोग्याः । यथा हि मनुष्याणां परिपूर्णं मनुष्यक्षेत्रं मृत्यधिकरणयोग्यम्, इत्वा च ततः सर्वस्मादनन्ता मनुष्या मृतिं गत्यन्तरमवाप्तास्तथा परिपूर्णस्य तिर्यक्क्षेत्रस्य तिरश्चां मृत्यधिकरण–योग्यत्वेन तदेकरज्जुवृत्तविस्तृतात्परिपूर्ण–तिर्यक्क्षेत्रात् मृत्युमवाप्या–ऽनन्तास्तिर्यञ्चोऽतीतकाले स्व–प्रायोग्यगत्यन्तरे–ऽवश्यमिताः, तन्मध्ये–ऽनन्ताः सप्तमभूमौ नारकतयाप्युत्पन्नाः सर्वस्मात् तिर्यगेकरज्जुवृत्त–विस्तृतात् तिर्यक्क्षेत्रात् । तत्रोदितनरकायुषा–मुर्ध्वाधः षड्रज्जूच्छ्रिताः परिपूर्णतिर्यक्प्रतरप्रारब्धा ये अनन्ता आत्मदण्डा–स्तैस्तिर्यगेकरज्जु–वृत्तविस्तृतमूर्ध्वाधस्तिर्यग्लोकात् सप्तमभूमिपर्यन्तं षड्–रज्जुमानं घनं त्रसनाड्यन्तर्गतं सघनषड्रज्ज्वात्मकं क्षेत्रमापूरितं, नानाऽतीतकालापेक्षया स्पृष्टमेवेत्यर्थः । तदेवोपपातमधिकृत्य सप्तम–नरकमार्गणाभेदे तदेव च नरकगत्योघे त्रसनाडेः षट्चतुर्दशभागात्मिका मूलोक्तस्पर्शना विज्ञेया । यद्यपीह स्वयम्भूरमणसमुद्रस्य बहिर्जगतेः परभागवर्तिनि घनवात–वलयादिप्रान्तभागलक्षणे क्षेत्रे पञ्चेन्द्रियतिरश्चाम–सम्भवेन ततः क्षेत्रात् नारकतया न लभ्यते केषां–चितिरश्चामुत्पत्ति, तत एव तत्तिर्यग्लोक–प्रान्तभागस्पृक्तदात्मप्रदेशदण्डानामप्यप्राप्तेर्न लभ्यते तावत्क्षेत्रस्पर्शनाऽपि, तथा च नान्यूनषड्रज्जुस्पर्शना, किन्तु देशोनषड्रज्जव एव तथापि एकदेशन्यूनतामविवक्ष्य सामान्येनैव परिपूर्णाः षड्रज्जवो–ऽभिहिता । एवमेवान्यत्राऽपि सामान्यत एकद्वयादिरज्जु–स्पर्शनाऽभिधानेऽपि यथासम्भवमेकदेशादिना न्यूनाऽधिका वा सा स्वयमेवावसातव्येति ।

यथैवोत्पादात् तथैव समुद्घातादपि, केवलं तिर्यक्तयोत्पित्सुभिर्मुमूर्षुभिः सप्तमभूमिनारकैः सप्तमनरकात् मारणसमुद्घातेन प्रथमतस्तिर्यक् तत ऊर्ध्वमित्येवम–ऋजुनिक्षिप्त–स्वात्मप्रदेशदण्डैः स्पृष्टं क्षेत्रमतीतानन्त–कालापेक्षया यथोक्तं घनरज्जुषट्कमानं भवतीति । अत्र यद्यप्युक्ता–न्यनारकादितयो–त्पित्सुजीवकृतस्पर्शना भवत्येव, नवरं सा गौणी, उक्तस्पर्शनाऽन्तःप्रविष्टत्वादिति न योजिता, न पुनः सा सर्वथा न भवति, न वा नाधिकृतेति विज्ञेयम् । अनेनैव प्रकारेण वक्ष्यमाणै–कादिभागस्पर्शना त्रसनाडिगतघनरज्जु–रूपेणोपपादनीयेति ॥१४॥

पढमणरय-णवगेविज्ज-
पंचणुत्तरविमाणभेएसुं ।
ण हवेइ, गमागमओ,
दुविहा पुण जगअसंखंसो ॥१५॥

''**पढमे**''त्यादि, प्रथमपृथ्वीनरकभेदे, नवसु ग्रैवेयकदेवमार्गणा–स्थानेषु पञ्चसु अनुत्तरदेवभेदेषु चेत्येवं सर्वसंख्यया षोडशमार्गणास्थानेषु गमना–गमनकृतस्पर्शना न भवति । ''**दुविहा**'' त्ति उपपात–समुद्घात–भेदभिन्ना शेषद्विविधस्पर्शना तु लोकाऽसंख्येयभागमात्रा भवति । तत्र प्रथमनरके उत्पत्स्यमानानां तिरश्चामतीताऽनन्तकालापेक्षया समग्रतिर्यक् प्रतरव्यापित्वेऽपि तिर्यग्लोकप्रथमनरकयोरन्तरालस्य रज्ज्वसंख्येय–भागमात्रतया तिर्यगेकरज्जु–प्रमाणसमस्त–प्रतरस्पृष्टानामप्यात्मप्रदेश–दण्डानामूर्ध्वाधो रज्ज्वसंख्येयभागमात्रोच्छ्रितत्वेन द्विविधस्पर्शनाया अपि लोकासंख्येय–भागमात्रत्वमेव भवति । एवमेव शेषग्रैवेयकादिभेदेष्वपि तत्रोत्पित्सूनां मनुष्यतया मनुष्यक्षेत्रादेव तत्रोत्पत्तेः, तेषां च तिर्यक् प्रतरासंख्येयभाग–मात्रगतस्वस्थानानां ग्रैवेयकदेवानामप्यनन्तरभवे मनुष्यतयैवोत्पत्तेरूर्ध्वाधः षड्रज्जूच्छ्रिताऽऽत्मदण्डानां भावेऽपि

मनुष्यक्षेत्रस्य तेषां देवानां स्वस्थानक्षेत्रस्य च तिर्यक्प्रतराऽसंख्येय-भागमात्रगतत्वेन यथोक्तानामूर्ध्वाधः षड्रज्जुमानात्मदण्डानां तिर्यग्रज्ज्व-संख्येयभागमात्रबाहल्यभावादुपपात-समुद्घातकृता द्विविधाऽपि स्पर्शना लोकाऽसंख्येयभाग-मात्रा एव भवतीति । **इदमत्र हृदयम्**-विवक्षित-मुमूर्षुजीवानां यत्रावस्थानं सम्भवति तत्क्षेत्रं यत्र च ते उत्पत्स्यन्ते तत्क्षेत्रमित्येवं द्विविधमपि क्षेत्रं प्रत्येकं यत्र तिर्यक्प्रतरासंख्येयभागमात्रवर्ति भवति तत्र तयोरूर्ध्वाधोऽन्तरालस्य रज्जु-द्विरज्ज्वादि-प्रमाणत्वेऽपि तज्जीवकृतात्मप्रदेशदण्डानां तिर्यक्-प्रतराऽसंख्येयभागमात्रगतत्वेन स्पर्शनाऽपि लोका-ऽसंख्येयभागमात्रा भवति, उक्तक्षेत्रद्वयमध्यादेकविध-क्षेत्रस्याऽपि तिर्यक्प्रतरव्यापित्वे तु स्पर्शना सान्तरालोर्ध्वाधःक्षेत्र-मानानुसारेणैकद्व्यादिघनरज्जुमाना लभ्यते, ऊर्ध्वाधोवर्त्युक्तद्विविध-क्षेत्रान्तरालस्य रज्ज्वसंख्येयभागमात्रत्वे तु तस्य द्विविधक्षेत्रस्य परिपूर्ण-तिर्यक्प्रतरव्यापित्वेऽपि न भवति लोकासंख्येयभागादधिका स्पर्शनेति सर्वत्र यथासम्भवमभ्यूह्येति ॥१५॥

एमेवाऽऽहारदुगे,
अवेअ-मणणाण-संजमोहेसुं ।
परिहार-छेअ-समइअ-
सुहुमेसु परं ण उप्पाया ॥१६॥

''**एमेवाहारदुगे**' इत्यादि, 'एवमेव'-यावती प्रथमनरकादि-मार्गणाभेदपञ्चदशकेऽनुपदमभिहिता तावती एवा-ऽऽहारका-ऽऽहारकमिश्रकाययोगा-ऽपगतवेद-मनःपर्यवज्ञान-संयमौघ-सामायिक-छेदोपस्थापन-परिहारविशुद्धिक-सूक्ष्मसम्परायसंयमलक्षणेषु नवमार्गणाभेदेषु

भवति; '**परम्**'-केवलमिह मार्गणाभेदनवके उत्पादात् स्पर्शना नास्ति, आहारकत्वादिभावानामष्टवर्षातिक्रान्ताऽऽयुष्कजीवानामेव सम्भवेन भवाद्यसमयवर्तिनां तत्राऽनिवेशात्, तदेवमिह स्वस्थानतः समुद्घाततश्चेत्येवं द्विविधा स्पर्शना लोकासंख्येयभागमात्रा प्राप्यत इति ॥१६॥

दुइआइणिरयपणगे,
कमा इग-दु-ति-चउ-पंच भागात्थि ।
दुविहा ण गमागमओ,

''**दुइआइ**'' इत्यादि, द्वितीयादिषु पञ्चसु नरकपृथ्वीमार्गणा-स्थानेषु क्रमात् त्रसनाडेः एक-द्वि-त्रि-चतुः-पञ्चभागाः स्पर्शना भवति, कथम्भूते-त्याह-'**दुविहा**' त्ति उत्पादतः समुद्घातत-श्चेत्यर्थः । '**ण**' त्ति गमनागमनतस्तु प्रागिव न भवत्येव, काचित्स्वस्थानापेक्षया विशिष्टेत्यर्थः । तत्रैकादिभागमाना द्विविधस्पर्शना सप्तमनरकपृथिव्यां दर्शितषड्रज्जु-स्पर्शनावद्विभावनीया, तिर्यग्लोकाद् द्वितीयादिपृथिवी-नारकस्थानानामेकादिरज्ज्वन्तरेण व्यवस्थितत्वात् । तदुक्तं **लोकप्रकाशे**-

''सर्वाधस्तनलोकादारभ्योपरिगं तलम् ।
यावत्सप्तममेदिन्या एका रज्जुरियं भवेत् ॥९॥
प्रत्येकमेवं सप्तानां भुवामुपरिवर्तिषु ।
तलेषु रज्जुरेकैका स्युरेवं सप्त रज्जवः ॥१०॥'' इति ।

समस्तात् तिर्यग्लोकात् तत्र द्वितीयादिपृथिवीषु नारकतया, ततश्च द्वितीयादिनरकपृथिवीतस्तिर्यक्त्वेन समस्ततिर्यग्लोके उत्पत्तेरविरोधा-दिति ।

सव्वतिरि-णर-इग-विगलेसुं ॥१७॥

पणकायसव्वभेया-

ऽपज्जपणिंदितस-कम्मु-रलमीसे ।

णपुम-अमण-ऽणाहारे

गमागमा ण दुविहा लोगो ॥१८॥

''**सव्व**'' इत्यादि, सर्वेषु पञ्चसंख्याकेषु तिर्यग्गतिभेदेषु, सर्वेषु चतुःसंख्याकेषु मनुष्यगतिभेदेषु, सर्व्वेषु सप्तसंख्याकेषु एकेन्द्रियभेदेषु, सर्वेषु नवसंख्याकेषु विकलेन्द्रियभेदेषु, तथा पृथिव्यादि-पञ्च-कायसंबन्धिषु सर्वसंख्ययैकोनचत्वारिंशद्-भेदेषु, अपर्याप्तपञ्चेन्द्रिये, अपर्याप्तत्रसे, कार्मणकाययोगे, औदारिकमिश्रकाययोगे, नपुंसकवेदा-ऽसंज्ञ्य-ऽनाहारकेष्वित्येवं सर्वसंख्यया एकसप्ततिमार्गणास्थानेषु गमागमात् स्पर्शना न भवति, करणतः पर्याप्तानां देवानामप्रवेशेन स्वस्थानस्पर्शनातो नातिरिच्यत इति भावः । ''**दुविहा लोगो**'' त्ति शेषा उत्पादसमुद्-घातभेदभिन्ना द्विविधा परिपूर्णलोकमाना भवति, प्रत्येकमार्गणागतजीवानां ततश्च्युत्वा सर्वलोकव्यापिसूक्ष्मैकेन्द्रियतया सूक्ष्माणां तत्तन्मार्गणासु मनुष्यादितया उत्पत्तेर्विहितत्वाच्चेति ॥१८॥

एमेव दुहाऽट्ठंसा,

गमागमेण य पणिंदियतसेसुं ।

सिं पज्जेसु तहा पण-

मणवय-कायोहजोगेसुं ॥१९॥

ओराल-थी-पुमेसुं,

कसायचउगे य तिविहअण्णाणे ।

अयते णयणा-ऽणयणे,

कुलेस-भव्वि-यर-मिच्छेसुं ॥२०॥

सण्णिम्मि य आहारे,

हवेइ फुसणा परं ण उप्पाया ।

पणमणवयजोगेसुं,

